दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लपञ्चमी
कार्तिक 29 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-12 ■ वर्ष-6 ■ अङ्क-18 | 1 | नवम्बर 14, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 प्रधानमन्त्रिणा नरेन्द्र-मोदिना कर्णाटके बेङ्गलुरु-मङ्गलुरु-मडगांव-वन्दे-भारत-रेलयानस्य शुभारम्भो विहितः

4 हिमाचल-मन्त्रिमण्डल-उपवेशनम् : महिलाभ्यः प्रतिमासं पञ्चदशशतं (१५००) रूप्यकाणि, त्रिंशतं (३००) माग्राकाणि विद्युत् अपि लप्स्यते

9 संस्कृताध्ययनेन वृत्तेः नवीनाः सम्भावनाः उद्घाटिताः गाजोलमहाविद्यालये विशेषः वृत्तिपरामर्शकार्यक्रमः सम्पन्नः।

राष्ट्रपतिपदासीनया द्रौपदी मुर्मुः इत्यनया राष्ट्रपति-भवने पञ्चविंशत्युत्तर-द्विसहस्रतमस्य वर्षस्य 'राष्ट्रिय-क्रीडा-पुरस्काराः' समर्पिताः



हिमसंस्कृतवार्ता नवदेहली।
राष्ट्रपतिपदासीनया द्रौपदी मुर्मुः इत्यनया राष्ट्रपति-भवने आयोजिते समारोहे पञ्चविंशत्युत्तर-द्विसहस्रतमवर्षस्य 'राष्ट्रिय-क्रीडा-पुरस्काराः' तथा चतुर्विंशत्युत्तर-द्विसहस्रतमवर्षस्य 'तेनजिङ्ग-नोर्गे-राष्ट्रिय-साहस-पुरस्काराः च प्रदत्ताः। क्रीडा-जगति उत्कृष्ट-कौशलस्य सम्माननाय प्रतिवर्षम् एते पुरस्काराः समर्प्यन्ते। अस्मिन् वर्षे सप्तदश क्रीडकाः 'अर्जुन-पुरस्कारेण' सम्मानिताः, येषु तेजस्विन्-शङ्करः, प्रियङ्का-गोस्वामी, चतुरङ्ग-क्रीडिका दिव्या-जितेन्द्र देशमुखः, हॉकी-क्रीडकः राजकुमार पालः, कबड्डी-क्रीडिका पूजा च प्रमुखाः सन्ति। वयोवृद्धाय पादकन्दुक-क्रीडकाय इसैयाह-अरुमैनायगमाय अर्जुन-पुरस्कारः प्रदत्तः। पञ्च प्रशिक्षकाः 'द्रोणाचार्य पुरस्कारेण' विभूषिताः येषु परवीर सिंहः, छोटेलाल यादवः, नेहा-नन्दकुमार चव्हाणश्च नियमित-वर्गे, धर्मेन्द्र-सिंह-यादवः वीरेन्द्र कुमारश्च आजीवन-वर्गे सम्मानं प्राप्तवन्तौ। क्रीडा-विकास-योगदानाय पुणे-नगरस्य सैन्य-दिव्याङ्ग-क्रीडा-केन्द्र 'राष्ट्रिय-क्रीडा-प्रोत्साहन पुरस्कारेण' तथा बलजीत कौर-रिमो-साहा-समेत्य चत्वारः साहसिनः 'तेनजिङ्ग-नोर्गे-पुरस्कारेण' सम्मानिताः।

योगः आयुर्वेदश्च स्वस्थ-जीवनशैलीं मानवतायाः सर्वाङ्गीण विकासं च पोषयतः - प्रधानमन्त्री



योगः आयुर्वेदश्च भारतस्य आर्ष-प्रज्ञां प्रति विश्वस्य जिज्ञासां जागृतवन्तौ इति प्रधानमन्त्रिणा नरेन्द्र-मोदिना प्रतिपादितम्। बेङ्गलुरु-नगरे 'स्वामी विवेकानन्द-योग-अनुसन्धान संस्थानस्य' स्वर्ण-जयन्ती-महोत्सवे विदुषः लेखकस्य एच. वी. शेषाद्रेः जन्मशताब्दी समारोहे च उद्बोधयन् सः अवोचत् यत् योगः आयुर्वेदश्च स्वस्थ-जीवनशैलीं मानवतायाः सर्वाङ्गीण विकासं च पोषयतः। अवसरेऽस्मिन् तेन स्वर्ण जयन्ती-प्रशासनिक भवनस्य शिलान्यासः कृतः, केरलस्य तिरुवनन्तपुरम्-नगरे संस्थानस्य शाखा-परिसरः च लोकार्पितः। सुविशालां जनसभां सम्बोधयन् प्रधानमन्त्रिणा प्रोदीरितं यत् योग-आयुर्वेदयोः प्रसारार्थं शासनेन बहवः नूतनाः प्रयासाः समाब्धाः सन्ति।

सप्तपञ्चाशत्तमः भारतीय-अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवः नवम्बर-मासस्य विंशतिः दिनाङ्कात् गोवा-प्रदेशे प्रारप्स्यते।
गोवा-मुख्यमन्त्री डा. प्रमोद सावन्तः पणजी-नगरे सप्तपञ्चाशत्तमस्य 'भारतीय-अन्ताराष्ट्रिय-चलच्चित्र महोत्सवस्य' प्रस्तावक-वार्ताहर-गोष्ठीम् आयोजयत्। नवदिवसीयोऽयं समारोहः अस्मिन् मासे विंशति-दिनाङ्कात् अष्टाविंशति-दिनाङ्कपर्यन्तं प्रवर्तिष्यते। महोत्सवे षडशीति-देशानां सार्धशताधिकानि वैदेशिक-चलच्चित्राणि, षट्सप्ततिः भारतीय-चलच्चित्राणि, चतुर्दश भव्य-प्रथम-प्रदर्शनानि च समाविष्टानि सन्ति। अत्र विश्व-स्तरीयाणि, एशिया-स्तरीयाणि, भारतीय-स्तरीयाणि च विशिष्ट-प्रदर्शनानि भविष्यन्ति,

सुभाषितम्

**चला लक्ष्मीश्चलाः प्राणाश्चलं जीवितयौवनम्।
चलाचलो च संसारे धर्म एको हि निश्चलः।।**

भावार्थः- धन संपत्ति (लक्ष्मी), प्राण, जीवित रहने की अवधि तथा यौवन अस्थिर और चलनीय होते हैं। इस संसार में सभी कुछ अस्थिर और परिवर्तनशील है और केवल धर्म (सद् आचरण) ही निश्चल (अपरिवर्तनीय) है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263

सूचना- हिमसंस्कृतवार्तापत्रे दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा, प्रचारगणः- जगदीश झाभी गुजरातम्, बृजेश कुमार पाण्डेयः, उ.प्र, सत्येन्द्रपाठकः उ.प्र, डा.विमलेश झा बिहारम्, डा.राधवनाथ झा बिहारम्, डॉ.पद्मनाभः हिमाचलम्, डा.निशिकान्त पाण्डेयः प.बंगाल, नवीन ममगाईं उत्तराखण्ड, कुलदीप मैन्दोला उत्तराखण्ड, डा.नवीनशर्मा हरियाणा, अजय कुमार आर्य पंजाब, ईशान तिवारी दिल्ली, रवि खरडिहालः कर्नाटक, डॉ.वर्षा टोणगांवकरः, सुधा साळवे महाराष्ट्रम्, ईदर धीरजः आन्ध्रप्रदेशः, नारद उपाध्यायः, डा.नयन ज्योति शर्मा असम

केन्द्रीय-मन्त्रिणा अश्विनी वैष्णवेन कोङ्कण-तटीय-कर्नाटकयोः रेलयान-संरचनायाः सुदृढीकरणाय केन्द्रस्य संकल्पः पुनः उद्घोषितः



मङ्गलुरु-जंक्शन-स्थानके बहुप्रतीक्षितायाः 'वन्दे-भारत-द्रुतगामिन्याः' हरित-ध्वज-प्रदर्शनेन शुभारम्भानन्तरं केन्द्रीय-रेलयान-सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः तटीय-प्रदेशस्य कृते प्रमुखाणाम् आधारभूत-संरचना-परिवर्धनानां रूपरेखां प्रस्तुतवान्। बेङ्गलुरु-नगरात् मङ्गलुरु-उडुपी-कारवार-मार्गेण गोवा-राज्यस्य मडगांव-नगरं प्रति नूतन-रेलयानस्य लोकार्पणानन्तरं जनसमुदायं सम्बोधयन् मन्त्री घोषितवान् यत् 'अमृत-भारत-स्थानक-योजनायाः' अन्तर्गतं मङ्गलुरु-मध्यमं तथा मङ्गलुरु सङ्गमं चेति उभयोः रेलस्थानकयोः पुनर्विकासः विधास्यते। विशेषतः मङ्गलुरु-मध्यम-स्थानकस्य आधुनिकीकरणाय चतुर्नवति-कोटिरूप्यकाणाम् अनुदानं स्वीकृतम् अस्ति। यशवन्तपुर-स्थानकात् प्रस्थिता इयं सुसज्जिता नूतना द्रुतगामिनी प्रायशः सार्धाष्टशत-किलोमीटर-मिते मार्गे आधुनिकां, तीव्रां, सुखदां च यात्रां सुनिश्चितं करोति ।

प्रधानमन्त्रिणा नरेन्द्र-मोदिना कर्णाटके बेङ्गलुरु-मङ्गलुरु-मडगांव-वन्दे-भारत-रेलयानस्य शुभारम्भो विहितः

अथ पञ्चदशसहस्र-कोटिरुप्यतोप्यधिकानां विकास-परियोजनानां लोकार्पणं विहितम्



प्रधानमन्त्री नरेन्द्रमोदी कर्नाटकराज्ये षट्शताधिक पञ्चदशसहस्र-कोटितोप्यधिक रूप्यकाणां विभिन्न-विकास-परियोजनानां शुभारम्भं कृतवान्। एतासु परियोजनासु मेट्रो, रेलयान-सम्पर्कः, नवीकरणीय-ऊर्जा, विद्युत्-प्रसारणं तथा पेट्रोलियम-आधारभूत संरचना च समाविष्टाः सन्ति। प्रधानमन्त्रिणा 'कालेन-अग्रहार' इत्यस्मात् 'तावरेकेरे' पर्यन्तं सार्ध-सप्त-किलोमीटर-दीर्घस्य बेङ्गलुरु मेट्रो- पिंक लाईन मार्गस्य समुद्घाटनं विहितम्, यत्र षट् स्थानकानि अन्तर्भवन्ति। अनेन सह बेङ्गलुरु-नगरस्य कार्यरतं मेट्रो-सञ्जालं शत-किलोमीटर-पर्यन्तम् अतिक्रान्तम्। नूतनमार्गेण नगरीय-सम्पर्कः सुदृढो भविष्यति तथा यातायात-सम्मर्दः न्यूनीभविष्यति। जनसमुदायं सम्बोधयन् श्रीमोदी न्यगादीत् यत् अद्यतनो दिवसः बेङ्गलुरु-वासिनां समग्र-कर्नाटक-जनतायाश्च कृते विशिष्टो वर्तते ।

'अमृत-भारत-स्थानक-योजनायाः' अन्तर्गतं चामराजनगर-चिक्कमगलूरु-सकलेशपुर-सुब्रह्मण्यरोड-इत्येतेषु चतुर्षु स्थानेषु पुनर्विकसितानां रेलस्थानकानाम् उद्घाटनं कृतम्। रेलयान-क्षेत्रे प्रधानमन्त्रिणा 'अमृत-भारत-स्थानक-योजनायाः' अन्तर्गतं चामराजनगर-चिक्कमगलूरु-सकलेशपुर-सुब्रह्मण्यरोड-इत्येतेषु चतुर्षु स्थानेषु पुनर्विकसितानां रेलस्थानकानाम् उद्घाटनं कृतम्। तेन पञ्चचत्वारिंशत्-किलोमीटर-दीर्घः बागलकोट-वण्डाल-द्विगुणित-रेलमार्गः तथा पञ्चपञ्चाशत्-किलोमीटर-परिमितः विद्युतीकृतः सकलेशपुर-सुब्रह्मण्य-घट्ट-मार्गः राष्ट्राय समर्पितः। ऊर्जा-क्षेत्रे प्रधानमन्त्रिणा मङ्गलुरु-नगरे अशीतिसहस्र-मीट्रिक टन क्षमतायुक्तं भूमिगत द्रवित-पेट्रोलियम-वायु-भण्डारण-गृहागृहं राष्ट्राय समर्पितम्, यत् देशस्य एतादृशं विशालतमं भण्डारण केन्द्रं मन्यते।

पवित्र-स्नानेन शुचिता-सङ्कल्पेन च समन्वितेन 'नहाय-खाय' अनुष्ठानेन सह लोक-आस्थायाः 'छठ-महापर्व' विधिवत् आचरितः



पवित्र-स्नानेन शुचिता सङ्कल्पेन च समन्वितः चतुर्दिवसीयः लोक-आस्थायाः महापर्व 'छठ' 'नहाय-खाय' इत्याख्येन अनुष्ठानेन गतदिने समारब्धः। समग्रे बिहार-प्रदेशे श्रद्धालवः परमश्रद्धया पारम्परिकरीत्या च भगवतः भास्करस्य छठी-मातुः आराधने निरताः सन्ति। पर्वणः प्रथमे दिवसे भक्ताः पवित्रेषु जलेषु सरोवरेषु वा स्नात्वा स्वगृहाणां सम्मार्जनं कृतवन्तः। शुचितायाः कठोरं नियमं पालयन्तः व्रतिनः ओदनं, कूष्माण्ड-शाकं, चणक-सूपं च निष्पाद्य सर्वप्रथमं छठी-मात्रे नैवेद्यम् अर्पयन्ति। ततः परं व्रतिभिः परिवारजनैश्च प्रसाद-ग्रहणेन चतुर्दिवसीयस्य कठिन-व्रतस्य अनुष्ठानं विधिवत् प्रवर्तते।

'छठ महापर्वणः शुभारम्भे प्रधानमन्त्रिणा नरेन्द्र-मोदिना देशवासिभ्यः शुभकामनाः प्रेषिताः।

लोक-आस्थायाः दिवाकर-उपासनायाः च पवित्रस्य चतुर्दिवसीयस्य 'छठ महापर्वणः शुभारम्भे प्रधानमन्त्रिणा नरेन्द्र-मोदिना देशवासिभ्यः शुभकामनाः प्रेषिताः। सामाजिकान्तर्जालीये स्वसन्देशे श्रीमोदी प्रावोचत् यत् पर्वणः आद्यो दिवसः 'नहाय-खाय' इति नाम्ना आचर्यते। व्रत-नियमान् पालयद्भ्यः सर्वेभ्यः भक्तेभ्यः शुभाशयान् प्रयच्छन् तेन छठी-मातुः अनुकम्पा सर्वेषां कृते कल्याणकारिणी भवतु इति कामना प्रकटिता।

असम-प्रान्ते काजीरङ्ग-समीपे रङ्गाजन-ग्रामे एकस्यां भीषणमार्ग-दुर्घटनायां त्रयोविंशतिजनाः मृत्युमुपगताः

असम-प्रान्ते काजीरङ्गा-समीपे रङ्गाजन-ग्रामे एकस्यां भीषणमार्ग-दुर्घटनायां त्रयोविंशतिजनाः मृत्युमुपगताः इति सम्भाव्यते। यात्री-यानेन सह एकस्य तीव्रगामिनः भारवाहक-यानस्य सम्मुख-संघर्षेण इयम् दुर्दशा समुपस्थिता।

अंशविपणिसमाचारः

भारतीयांशविपण्यां सप्ताहान्ते अवनतिः

हिमसंस्कृतवार्ताः- डॉ विमलेश झा। १३ नवम्बर २०२६ दिनाङ्के सप्ताहस्य अन्तिमे व्यवसायदिवसे भारतीयांशविपण्यां रक्तचिह्ने समापनं जातम्। विगतत्रिदिनानां निरन्तरवृद्धेः अनन्तरं अद्य विपण्यां विक्रयप्रभावः परिलक्षितः। फलतः प्रमुखसूचकाङ्कयोः सेन्सेक्स-निफ्टी इत्यनयोः अवनतिः अभवत्। मुम्बई-शेयरविपण्याः सेन्सेक्ससूचकाङ्कः ३१८.५६ अङ्कैः अर्थात् ०.३९ प्रतिशतं न्यूनतां प्राप्य ८१,५९२.४५ इति स्तरे आगतः। तथैव राष्ट्रियशेयरविपण्यस्य निफ्टीसूचकाङ्कः १५५.०५ अङ्कैः अर्थात् ०.६१ प्रतिशतं पतित्वा २५,१४४.३० इति स्तरे स्थितः।अक्टोबरमासे खुद्रामुद्रास्फीतिः वर्धिता भूत्वा ६.०९ प्रतिशतं यावत् प्राप्ता। अस्याः कारणात् आगामिनि दिसम्बरमासे भारतीय-रिजर्व-बैङ्केन वृद्धि-मूल्येषु वृद्धिः क्रियेत इति आशङ्का वर्धिता। अपि च अन्तर्राष्ट्रियविपण्ये कच्चातैलस्य मूल्यं प्रतिबैरलम् ९५ डॉलरमिति अतिक्रान्तम् जातम्। एतेन सह निवेशकैः लाभांशप्राप्त्यर्थं कृतया लाभप्राप्तक्रियया अपि भारतीयांशविपण्यां विक्रयप्रभावः वर्धितः।अद्य बैंकिङ्क्षेत्रे सर्वाधिकं दुर्बलतां दृष्टा। बैंकनिफ्टीसूचकाङ्कः ४८४ अङ्कैः न्यूनः अभवत्। वाहननिर्माणक्षेत्रे , अचलसम्पत्तिक्षेत्रे , धातुक्षेत्रे च अधिकांशानां समभागानां मूल्येषु न्यूनता अभवत्।

डाकार-युवा-ओलिम्पिक महोत्सवे स्वर्णद्वय-रजतत्रय-कांस्यपञ्चकात्मक-दशपदक-विजयेन भारतेन ऐतिहासिकं साफल्यं लब्धम्



सेनेगलस्य डाकार-नगरे संपन्ने ग्रीष्मकालीन-युवा-ओलिम्पिक सङ्ग्रामे भारतेन दश पदकानि (स्वर्णद्वयं, रजतत्रयं, कांस्यपञ्चकम्) विजित्य ऐतिहासिकं विजयाभियानं सुसम्पन्नम्। पदकविजेतृषु पंच 'खेलो इंडिया' क्रीडकाः अपि अन्तर्भवन्ति ।

भारतं बाङ्ग्लादेशेन सह सुहृद्भावपूर्णं, रचनात्मकं, भविष्योन्मुखं च सम्बन्धम् अभिलषति - विदेशमन्त्रालयः



विदेश-मन्त्रालयेन प्रोक्तं यत् भारतं बाङ्ग्लादेशेन सह सुहृद्भावपूर्ण, रचनात्मकं, भविष्योन्मुखं च सम्बन्धम् अभिलषति। नवदिल्ल्यां सम्पादिते वार्ताहरसम्मेलने कूटनैतिक वार्तायाः प्रश्ने विदेश मन्त्रालयस्य प्रवक्ता रणधीर-जैसवालः प्रावोचत् यत् अस्मिन् क्रमे वाणिज्य-रेल-जलसंसाधन-सीमारेखा-प्रबन्धनादीनां विविध-क्षेत्राणां अन्तर्गतं संरचित-माध्यमैः नूतनाः उपक्रम-प्रक्रियाः समनुष्ठिताः।

आयुष्मान-भारत-योजनायां महत्त्वपूर्णं परिवर्तनम्; अधुना ११२ रोगाणां चिकित्सा केवलं सर्वकारीय-चिकित्सालयेषु एव भविष्यति



नवदेहली, १४ नवम्बर २०२६: केन्द्रसर्वकारेण आयुष्मान-भारत-योजनायां एकं महत्त्वपूर्णं परिवर्तनं कर्तुं सज्जता कृता अस्ति। अस्य नूतननिर्णयस्य अनुसारम्, अधुना योजनायाः लाभार्थिनः १०० तः अधिकानां रोगाणां निःशुल्कचिकित्सार्थं सर्वकारीय-चिकित्सालयं गमिष्यन्ति। एतेषां रोगाणां निःशुल्कचिकित्सा निजी-चिकित्सालयेषु न भविष्यति। इदं परिवर्तनं २०२६ तमस्य वर्षस्य दिसम्बर-मासस्य प्रथम-दिनाङ्कात् (१ दिसम्बर २०२६) प्रवर्तिष्यते।

११२ रोगाः सर्वकारीय-चिकित्सालयेभ्यः आरक्षिताः

प्राप्तसूचनानुसारं, राष्ट्रीय-स्वास्थ्य-प्राधिकरणेन (NHA) सर्वेभ्यः राज्य-स्वास्थ्य-प्राधिकरणेभ्यः (SHA) निर्देशः दत्तः यत् ते ८९ अतिरिक्त-चिकित्सा-पैकेज-इत्येतान् केवलं सर्वकारीय-चिकित्सालयेभ्यः आरक्षितान् कुर्वन्तु। पूर्वं केवलं २३ रोगाणां चिकित्सा निजी-चिकित्सालयेषु निषिद्धा आसीत्, परन्तु अधुना एषा संख्या वर्धयित्वा ११२ कृता अस्ति। यद्यपि, विभिन्नानां राज्यानां पार्श्वे एषः अधिकारः अस्ति यत् ते निजी-चिकित्सालयेभ्यः एतान् पैकेज-इत्येतान् अपनयन्तु अथवा न।

निर्णयस्य मुख्यं कारणम्

सर्वकारेण ११२ रोगाणां चिकित्सां केवलं सर्वकारीय-चिकित्सालयेषु सीमितं कर्तुं मुख्यं कारणं निजी-चिकित्सालयानाम् अत्यधिकं देयकं (भुगतानं) अवरोद्धुं तथा च सर्वकारीय-स्वास्थ्य-सुविधाः सुदृढाः कर्तुम् अस्ति।

एतेषां रोगाणां चिकित्सा निजी-चिकित्सालयेषु न भविष्यतिः अधुना पर्यन्तम् आयुष्मान-पत्रेण (कार्ड द्वारा) निजी-चिकित्सालयेषु यासां व्याधीनां चिकित्सा भवति स्म, तासु अधोलिखिताः प्रमुखाः सन्ति यासां चिकित्सा अधुना केवलं सर्वकारीय-चिकित्सालयेषु एव भविष्यति –

शल्यचिकित्सा एवं स्त्रीरोगः-: मोतियाबिन्दस्य (Cataract) शल्यक्रिया, गर्भाशय-उच्छेदनम् (Hysterectomy), गर्भसमापनम् (MTP), सिस्ट (Cyst) तथा फिस्टुला (Fistula) निवारणम्, बायोप्सी (Biopsy), अस्थिभङ्गस्य (Fracture) शल्यक्रिया च।

सामान्य-चिकित्सा (General Medicine): उच्च-सङ्कटपूर्ण-प्रसवः (High-risk delivery), गम्भीरा रक्ताल्पता (Severe Anemia), मद्यजनित-यकृत्-रोगः (Alcoholic liver disease), हेपेटाइटिस, अग्न्याशयशोथः (Pancreatitis), तीव्र-श्वसनीशोथः (Acute bronchitis), मलेरिया, चिकनगुनिया, गम्भीरः अतिसारः (Diarrhea) च।

अन्याः चिकित्साः-: मानसिक-स्वास्थ्य-सम्बद्धाः रोगाः तथा च नेत्र-कर्ण-कण्ठ-सम्बद्धाः (ENT) रोगाः।

अतः सर्वे लाभार्थिनः सूच्यन्ते यत् १ दिसम्बर २०२६ तः उपर्युक्तानां रोगाणां निःशुल्कचिकित्सार्थं समीपस्थं सर्वकारीय-चिकित्सालयं गच्छेयुः।

भारतीय-रेलमार्गः रचयितुं गच्छति नूतनम् इतिहासं, लेह-क्षेत्रे निर्मास्यते विश्वस्य सर्वोच्चं रेलस्थानकम्





हिमसंस्कृतवार्ता — बिलासपुरम्। हिमालयस्य दुर्गमासु उपत्यकासु भारतीय-रेलमार्गः एकं नूतनम् इतिहासं रचयितुं सज्जतायां वर्तते। प्रस्तावितायां 'बिलासपुर-मनाली-लेह' रेलपङ्क्तौ विश्वस्य सर्वोच्चं रेलस्थानकं (रेलवे स्टेशन) निर्मातुं योजना अस्ति। लद्दाख-प्रदेशे 'तङ्गलाङ्ग-ला' (Tanglang La) गिरिद्वारस्य समीपे 'टेङ्गला' (Tengla) नामके स्थाने प्रायः सप्तदशसहस्र-पञ्चशत-द्वाशीति-पाद (१७,५८२ फीट) परिमितोन्नतायां (ऊँचाई पर) इदं स्थानकं प्रस्तावितं कृतम् अस्ति। यदि इयं योजना साकाररूपं धरिष्यति, तर्हि भारतस्य नाम्नि विश्वस्य सर्वोच्च-रेलस्थानकस्य कीर्तिमानं (रिकॉर्ड) पञ्जीकृतं भविष्यति। अनेन तिब्बत-स्थितं चीनदेशस्य 'ताङ्गुला' (Tanggula) रेलस्थानकं पृष्ठतः स्थास्यति, यद् सम्प्रति षोडशसहस्र-षट्शत-सप्तविंशति-पाद (१६,६२७ फीट) परिमितोन्नतया सह विश्वस्य सर्वोच्चं रेलस्थानकं मन्यते। प्रस्तावितं 'टेङ्गला'-स्थानकं समुद्रतलात् प्रायः पञ्चसहस्र-त्रिशत-एकोनषष्टि-मीटर (५,३५९ मी.) परिमितोन्नतायां भविष्यति। यदा तु चीनदेशस्य 'ताङ्गुला'-स्थानकं पञ्चसहस्र-अष्टषष्टि-मीटर (५,०६८ मी.) परिमितोन्नतायां स्थितम् अस्ति। एवं प्रकारेण भारतीय-रेलमार्गस्य प्रस्तावितस्थानकं चीनदेशस्य वर्तमान-कीर्तिमानात् प्रायः एकनवत्यधिक-द्विशत-मीटर (२९१ मी.) अर्थात् प्रायः पञ्चपञ्चाशदधिक-नवशत-पाद (९५५ फीट) अधिकोन्नतायां भविष्यति। प्रायः एकोननवत्यधिक-चतुश्शत-किलोमीटर (४८९ कि.मी.) दीर्घा प्रस्तावित 'बिलासपुर-मनाली-लेह' रेलपङ्क्तिः हिमालयस्य अतीव दुर्गमेभ्यः उच्चतायुक्तेभ्यश्च क्षेत्रेभ्यः निर्गमिष्यति।

रेलमार्ग-सञ्जाले (नेटवर्के) स्थापयिष्यते नूतनः कीर्तिमानः

इयं परियोजना न केवलं भारतीय-रेल-अभियान्त्रिकी-क्षेत्राय (इंजीनियरिंग-कृते) महती उपलब्धिः प्रमाणिता भवितुं शक्नोति, अपि तु विश्वस्य रेलमार्ग-सञ्जालेऽपि नूतनं कीर्तिमानं स्थापयितुं पारयिष्यति। अस्य रेल-वीथेः (कॉरिडोर) माध्यमेन हिमाचलप्रदेशस्य बिलासपुरनगरं लद्दाख-प्रदेशस्य लेह-नगरेण सह संयोजयितुं परिकल्पना अस्ति। प्रस्तावितमार्गे सुन्दरनगरं, मण्डी, मनाली, केलाङ्ग, सरचू, उपशी इत्यादीनि महत्त्वपूर्णानि स्थानानि समाविष्टानि सन्ति। रेलपङ्क्तेः निर्माणेन सामरिकदृष्ट्या महत्त्वपूर्णस्य लद्दाख-क्षेत्रस्य सम्पर्कव्यवस्थायै (कनेक्टिविटी-कृते) दृढताप्राप्तेः सम्भावना वर्तते।

पाकिस्तानतः पञ्चशताधिकाः हिन्दवः भारतम् आगमिष्यन्ति, गङ्गादर्शनस्य अभिलाषः पूरयिष्यते

हिमसंस्कृतवार्ता:वृजेश कुमार पाण्डेय

काशी। राजाभैया-महोदयेन आयोज्यमानायां कथायां भागं ग्रहीतुं पाकिस्तानदेशात् प्रायः पञ्चशतं हिन्दवः भारतम् आगन्तुं सज्जाः सन्ति। राजाभैया-महोदयेन उक्तं यत् पाकिस्तानदेशे निवसतां हिन्दुपरिवाराणां सह तस्य पूर्वमेव वार्तालापः प्रचलति स्म। ते परिवाराः मातुः गङ्गायाः दर्शनं कर्तुम् इच्छां प्रकटितवन्तः आसन्।तदनन्तरं राजाभैया-महोदयेन तेषां भारतागमनस्य निवासस्य च समुचिताः व्यवस्थाः कृताः सन्ति।कथायाः श्रवणानन्तरं सर्वे श्रद्धालवः काशीनगरं गत्वा श्रीकाशीविश्वनाथमन्दिरे भगवतः भोलेनाथस्य दर्शनं करिष्यन्ति। ततः अयोध्यां प्राप्य मर्यादापुरुषोत्तमस्य प्रभोः श्रीरामस्य दर्शनं कृत्वा तस्य आशीर्वादं च प्राप्स्यन्ति।अनेन भारतागमनेन श्रद्धालूनां गङ्गादर्शनस्य तथा प्रमुखतीर्थस्थलानां दर्शनस्य च अभिलाषः पूर्णः भविष्यति।

सिद्धार्थनगरे द्वयोः विशेषलोकन्यायालययोः आयोजनम्, चेक-अनादरणस्य वाहनचालानसम्बद्धानां च प्रकरणानां निस्तारणं भविष्यति

हिमसंस्कृतवार्ता:वृजेश कुमार पाण्डेय

सिद्धार्थनगरम्। उत्तरप्रदेशराज्यविधिकसेवा-प्राधिकरणस्य लखनऊस्थितस्य निर्देशानुसारं सिद्धार्थनगरजनपदे दिनाङ्के २१.११.२०२६ तमे दिनाङ्के परक्राम्यलेखाधिनियमस्य (NI Act) १३८-धारायाः अन्तर्गतानां प्रकरणानां निस्तारणाय विशेषलोकन्यायालयस्य आयोजनं भविष्यति।

हिमाचल-मन्त्रिमण्डल-उपवेशनम् : महिलाभ्यः प्रतिमासं पञ्चदशशतं (१५००) रूप्यकाणि, त्रिशतं (३००) मात्राकाणि विद्युत् अपि लप्स्यते



हिमसंस्कृतवार्ता — शिमला। हिमाचलप्रदेशे महिलाः आर्थिकदृष्ट्या सशक्ताः विधातुम् आरभ्य कृषकेभ्यः फलोत्पादकेभ्यश्च समाश्वासनं दातुं यावत्, मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य अध्यक्षतायाम् आयोजितायां मन्त्रिमण्डलस्य (कैबिनेट) गोष्ठ्यां बहवः महत्त्वपूर्णाः निर्णयाः स्वीकृताः। सर्वकारेण महिलानां कृते नूतनायै आर्थिकसहायतायोजनायै स्वीकृतिः प्रदत्ता अस्ति। अस्यान्तर्गततया अष्टादशवर्षेभ्यः एकोनषष्टिवर्षपर्यन्तानां (१८-५९) पात्रमहिलानां कृते प्रतिमासं पञ्चदशशतं (१५००) रूप्यकाणि प्रदास्यन्ते। अस्याः योजनायाः कृते प्रायः सार्धत्रिलक्ष-महिलानाम् (३.५० लक्ष) अभिज्ञानं कृतम् इति सूचना दत्ता। उपवेशने पात्रपरिवारेभ्यः त्रिशतं (३००) मात्राकाणि (यूनिट्) निःशुल्कं विद्युत् प्रदातुं, स्वास्थ्यसंस्थानेषु कर्मचारिणां नियुक्तिं कर्तुं, विद्युत्परियोजनानां नीतौ परिवर्तनम् आनेतुं, युवकाश्च मादकद्रव्येभ्यः दूरे स्थापयितुं राज्यव्यापीम् अभियानं चालयितुं सहितं बहुषु प्रस्तावेषु स्वीकृतिमुद्रा आरोपित।

महिलाभ्यः नूतना योजना, प्रतिमासं वित्तकोषे आगमिष्यन्ति १५०० रूप्यकाणि

प्रदेशसर्वकारेण महिलाभ्यः आर्थिकसहायतां समुपलब्धं कारयितुं 'मुख्यमन्त्री अपना परिवार सुखी परिवार योजना' आरब्धुं निर्णयः गृहीतः। योजनायाः अन्तर्गततया अष्टादशतः एकोनषष्टिवर्षपर्यन्ताभ्यः पात्रमहिलाभ्यः प्रतिमासं १५०० रूप्यकाणां सहायता दास्यते। सर्वकारेण अस्याः परिधौ आगच्छन्तीनां प्रायः ३.५० लक्ष-महिलानाम् अभिज्ञानं कृतम्। योजनया सह पात्रपरिवारेभ्यः ३०० मात्राकाणि (यूनिट्) निःशुल्कं विद्युत् समुपलब्धं कारयितुं प्राविधानमपि योजितम् अस्ति। मन्त्रिमण्डलेन निगदितं यद् एकोनषष्टिवर्षाधिकानां (५९+) महिलानां मासिकसहायता पूर्वमेव १०५० रूप्यकेभ्यः वर्धयित्वा १५०० रूप्यकाणि कृता वर्तते। अधुना इतः न्यूनवयस्कवर्गस्य पात्रमहिलाभ्यः अपि नूतनयोजनायाः माध्यमेन आर्थिकसहायता लप्स्यते। यद्यपि आवेदनप्रक्रियायाः पात्रतायाश्च सम्बद्धाः विस्तृताः नियमाः पृथक् निर्गमिष्यन्ति।

अतिरिक्तजलस्य विक्रयणाय निश्चेयते एकसमानं दरम्

प्रदेशस्य जलसंसाधनेभ्यः राजस्वसङ्ग्रहणाय सर्वकारः अतिरिक्त-अपक्वजलस्य (कच्चे पानी) विक्रयणम् अधिकृत्य नूतनव्यवस्थां प्रवर्तयिष्यति। अस्यान्तर्गततया प्रतिवेशिराज्येभ्यः, सर्वकारीयसंस्थानेभ्यः, औद्योगिक-एककेभ्यश्च जलं समुपलब्धं कारयितुं प्रारम्भिकं मूल्यं शतं (१००) रूप्यकाणि प्रति सहस्रं घन-पाद (१००० क्यूबिक् फीट्) निर्धारितम् अस्ति। इयं राशिः प्रदेशे पूर्वतः सञ्चालितासु भविष्ये च स्थाप्यमानासु जलपरियोजनासु प्रवर्तिष्यते। अन्ताराज्यीय-परियोजनाः अपि अस्याः परिधौ आगमिष्यन्ति। दरेषु समय-समये परिवर्तनं थोक-मूल्य-सूचकाङ्कस्य (WPI) आधारेण विधास्यते।

युवकान् मादकद्रव्येभ्यः रक्षितुं सर्वेषु मण्डलेषु क्रीडाभियानम्

मादकद्रव्याणां विरुद्धं जागरूकतां वर्धयितुं सर्वकारः 'खेलो हिमाचल चिट्टा मुक्त अभियान-२०२६' इत्येतद् आरप्स्यते। अस्य सञ्चालनं प्रदेशस्य सर्वेषु द्वादशसु मण्डलेषु विधास्यते। अभियानस्य माध्यमेन युवानः क्रीडाप्रतियोगिताभिः अन्याभिः शारीरिकगतिविधिभिश्च सह योजयितुं योजना वर्तते। सर्वकारस्य उद्देश्यं युवसु अनुशासनस्य, स्वस्थजीवनशैल्याः, सामाजिकदायित्वस्य च भावनां विकसितुम् अस्ति, येन ते मादकद्रव्येभ्यः दूरे स्थापयितुं शक्यन्ते।

पुरातन-विद्युत्परियोजनाभ्यः प्रदेशाय लप्स्यते अधिकः लाभः

मन्त्रिमण्डलेन 'स्वर्णजयन्ती-ऊर्जानीति-२०२१' इत्यस्यां संशोधनाय स्वीकृतिः प्रदत्ता। अस्यान्तर्गततया केन्द्रीय-सार्वजनिक-क्षेत्रस्य उपक्रमाणां (CPSUs) तादृशीषु विद्युत्परियोजनासु, याभिः चत्वारिंशत्वर्षाणां (४०) सञ्चालनं पूर्णं कृतम्, तासु आगामि-दशवर्षाणि यावत् पञ्चाशत् प्रतिशतं (५०%) निःशुल्क-ऊर्जा-राजस्वम् (फ्री पावर रॉयल्टी) प्रवर्तिष्यते। परियोजनायाः पञ्चाशत्वर्षाणि (५०) पूर्णानि भूत्वा सा विना किमपि मूल्यं हिमाचलसर्वकाराय हस्तान्तरयितुं प्राविधानं कृतम् अस्ति। अनेन प्रदेशाय दीर्घकालात् सञ्चालितासु विद्युत्परियोजनासु भविष्ये अधिका अंशभागिता लाभश्च लब्धुं शक्ष्यते।

कार्यम् अनारभमाणासु २३५ विद्युत्परियोजनासु कार्याचरणम्

सर्वकारेण दीर्घकालात् लम्बिताः विद्युत्परियोजनाः अधिकृत्य अपि कठोरः दृष्टिकोणः स्वीकृतः। मन्त्रिमण्डलेन द्विशत-द्वाविंशति (२२२) सौर-ऊर्जा-परियोजनानाम् आवण्टनं निरस्तीकर्तुं निर्णयः गृहीतः। एतेन सहैव पञ्चविंशति-मेगावाट् (२५ MW) क्षमतया अधिकानां त्रयोदश (१३) जलविद्युत्-परियोजनानाम् आवण्टनमपि निरस्तीकरिष्यते। एतदतिरिच्य विंशतिः (२०) जलविद्युत्-परियोजनाः नूतनरीत्या आवण्टयितुं पुनः निविदाप्रक्रिया (बोली-प्रक्रिया) आयोजयिष्यते। सर्वकारस्य लक्ष्यम् आवण्टनस्य पश्चादपि भूमौ कार्यम् अनारभमाणाः परियोजनाः अधिकृत्य अग्रिमं कार्याचरणं कर्तुम् अस्ति।

निजी-लोकयान-क्रयणे वर्धिता सर्वकारीयसहायता

'राजीवगान्धी-स्वरोजगार-स्टार्टअप्-योजना-२०२३' इत्यस्यान्तर्गततया निजी-लोकयान-सञ्चालकेभ्यः (बस ऑपरेटरेभ्यः) प्राप्यमाणायाम् आर्थिकसहायतायां परिवर्तनं कृतम् अस्ति। डीजल-लोकयानस्य क्रयणे अधुना चत्वारिंशत् प्रतिशतम् (४०%) अनुदानं (सब्सिडी) लप्स्यते, यदा तु पूर्वम् इयं सहायता त्रिंशत् प्रतिशतम् (३०%) आसीत्। हमीरपुर-लोकयानस्थानकात् (बस स्टैण्ड) डॉ. राधाकृष्णन-चिकित्सामहाविद्यालयं जोलसप्पड़ं यावत् तथा आईजीएमसी (IGMC) शिमलायाः नूतन-बहिरङ्गविभागात् (OPD) चमियाणास्थितम् अटल-आयुर्विज्ञान-अतिविशिष्ट-संस्थानं यावत् लोकयानसेवाभ्यः अपि विशेषं प्रावधानं कृतम् अस्ति। एतेषु मार्गेषु दशाधिकयात्रिणां क्षमतायुक्तानां विद्युल्लोकयानानां (इलेक्ट्रिक-बस) क्रयणे पञ्चाशत् प्रतिशतं (५०%) तथा डीजल-लोकयानानां क्रयणे चत्वारिंशत् प्रतिशतम् (४०%) अनुदानं दास्यते।

प्राकृतिक-आर्द्रकस्य सी-श्रेणी-सेवफलस्य च क्रयणमूल्यं वर्धितम्

कृषकेभ्यः फलोत्पादकेभ्यश्च समाश्वासनं ददता सर्वकारेण प्राकृतिककृष्या उत्पादितस्य आर्द्रकस्य न्यूनतम-समर्थनमूल्यं (MSP) त्रिंशद्रूप्यकेभ्यः (₹३०) वर्धयित्वा चत्वारिंशद्रूप्यकाणि (₹४०) प्रति किलोग्राम् कृतम् अस्ति। अपरत्र, विपणि-हस्तक्षेप-योजनायाः (MIS) अन्तर्गततया सी-श्रेणी-सेवफलस्य (सी-ग्रेड सेब) क्रयणमूल्येऽपि एकरूप्यकस्य वृद्धिः कृता। अधुना अस्य मूल्यं द्वादशरूप्यकाणां (₹१२) स्थाने त्रयोदशरूप्यकाणि (₹१३) प्रति किलोग्राम् भविष्यति। अनेन तेभ्यः फलोत्पादकेभ्यः लाभः लप्स्यते, येषाम् उत्पादनम् उत्तमश्रेण्यां समाविष्टं न भवति।

चिकित्सालयेषु सहस्रं (१०००) रोगिमित्राणां भविष्यति नियुक्तिः

स्वास्थ्यसेवाः श्रेष्ठतराः विधातुं प्रदेशस्य चिकित्सालयेषु सहस्रं (१०००) रोगिमित्राणि नियोक्तुं निर्णयः स्वीकृतः। एतेषां साहाय्येन चिकित्सालयम् आगच्छद्भ्यः रुग्णेभ्यः आवश्यकसुविधाः प्राप्तुं सहायता लप्स्यते। एतदतिरिच्य सर्वकारीय-चिकित्सामहाविद्यालयेषु, दन्तचिकित्सा-महाविद्यालयेषु, चिकित्साशिक्षा-निदेशालये च कनिष्ठ-कार्यालय-सहायकानां (JOA-IT) एकषष्ट्यधिक-पञ्चशतं (५६१) पदानि सृज्य पूरयिष्यन्ते। एतेषां कर्मचारिणां पदस्थापनं चिकित्सालय-प्रबन्धन-सूचना-प्रणाली (HMIS) प्रभावशालीरीत्या सञ्चालयितुं भविष्यति। स्वास्थ्यविभागे दत्तांश-प्रविष्टि-प्रचालकाः (डाटा एण्ट्री ऑपरेटराः) अपि नियोक्ष्यन्ते। सर्वकारीय-चिकित्सामहाविद्यालयेषु बाह्यस्रोताधारेण सेवां ददतां 'परफ्यूजनिस्ट्'-कर्मचारिणां मासिकमानदेयमपि पञ्चविंशतिसहस्रात् (२५,०००) वर्धयित्वा पञ्चत्वारिंशत्सहस्रं (४५,०००) रूप्यकाणि कर्तुं निर्णयः गृहीतः।

मुख्यमन्त्री सुक्खूः अवदत्—'चिट्टा'-मादकद्रव्यस्य विरुद्धं सङ्ग्रामः समग्रसमाजस्य वर्तते, सर्वैः राजनैतिकदलैः पुरतः आगन्तव्यम्



हिमसंस्कृतवार्ता — मण्डी।

मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः प्रावोचत् यत् 'चिट्टा'-मादकद्रव्यस्य विरुद्धं सङ्ग्रामः न कस्यचिद् एकस्य राजनैतिकदलस्य, अपि तु समग्रस्य समाजस्य सङ्ग्रामः अस्ति। युवानः मादकद्रव्येभ्यः रक्षितुम् आरब्धे अस्मिन् जनान्दोलने सर्वैः राजनैतिकदलैः जनप्रतिनिधिभिश्च पुरतः आगन्तव्यम्। मण्डी-नगरे आयोजितायाम् 'एण्टी-चिट्टा जागरूकता-पदयात्रायाम्' (वाकथॉन-कार्यक्रमे) मण्डलस्य अन्येऽपि विधायकाः सम्मिलिताः अभविष्यन् चेद् उत्तमम् अभविष्यत्।

मुख्यमन्त्री शुक्रवासरे पड्डल-प्राङ्गणे आयोजितायाः पदयात्रायाः (वाकथॉन) अन्तराले पत्रकारैः सह संवादं कुर्वन् आसीत्। सः अवदत् यत् मादकद्रव्याणां विरुद्धम् इदम् अभियानं राजनैतिकदृष्टिकोणेन न, अपि तु सामाजिकदायित्वरूपेण द्रष्टव्यम्।

प्रायः एकवर्षात् पूर्वम् आरब्धम् आसीत् जनान्दोलनम्

मुख्यमन्त्री अकथयत् यत् प्रदेशसर्वकारेण प्रायः एकवर्षात् पूर्वं युवावंशं (युवापीढी) सह नीत्वा 'चिट्टा'-मादकद्रव्यस्य विरुद्धं जनान्दोलनम् आरब्धम् आसीत्। मण्डी-नगरे महत्यां संख्यायां युवकानां सहभागितां दृष्ट्वा सः प्रसन्नः अभवत्। सः अवदत् यद् अयं न कस्यचिद् राजनैतिकदलस्य कार्यक्रमः, अपि तु सामाजिकसरोकारेण सम्बद्धम् अभियानम् अस्ति। अस्य उद्देश्यं युवकान् मादकद्रव्येभ्यः रक्षितुं तथा च प्रदेशं 'चिट्टामुक्तं' विधातुं सामूहिकप्रयासान् कर्तुम् अस्ति।

सामाजिककार्यक्रमाणां कृते निमन्त्रणम् अनिवार्यं नास्ति

सुक्खू-महोदयः अवदत् यद् ईदृशेषु सामाजिकसरोकारयुक्तेषु कार्यक्रमेषु भागं ग्रहीतुं कस्यापि निमन्त्रणस्य आवश्यकता न भवति। कोऽपि जनप्रतिनिधिः राजनैतिकदलं वा अस्य अभियानस्य अङ्गं भवितुं शक्नोति। सः प्रतिपादितवान् यत् 'चिट्टा'-मादकद्रव्यस्य विरुद्धं सङ्ग्रामे समाजस्य प्रत्येकस्य वर्गस्य सहभागिता अनिवार्या वर्तते। सर्वकारस्य लक्ष्यं सर्वेषां सहयोगेन सामूहिकप्रयासैश्च हिमाचलप्रदेशं 'चिट्टामुक्तं' निर्मातुम् अस्ति।

त्रिषु चिकित्सामहाविद्यालयेषु वृद्धानाम् उपचाराय विशेषा व्यवस्था

वृद्धरुग्णेभ्यः विशेषज्ञ-चिकित्सासुविधाः समुपलब्धं कारयितुं त्रिषु सर्वकारीय-चिकित्सामहाविद्यालयेषु 'जराचिकित्सा-विभागाः' (जेरियाट्रिक मेडिसिन विभागाः) स्थापयिष्यन्ते। एतेषु आईजीएमसी शिमला, डॉ. राजेन्द्रप्रसाद-चिकित्सामहाविद्यालयः टाण्डा, श्रीलालबहादुरशास्त्री-चिकित्सामहाविद्यालयः नेरचौक च समाविष्टाः सन्ति। एतेषां विभागानां सञ्चालनाय आवश्यकपदानां सृजनाय पूरणायक्षच अपि स्वीकृतिः प्रदत्ता। ज्येष्ठ-आवासिक-चिकित्सकानां (सीनियर रेजिडेण्ट्) पदान्यपि निर्मीयन्ते। काङ्गड़ा-मण्डलस्य नागरिक-चिकित्सालये नूरपुरे 'मातृ-शिशु-चिकित्सालय-वर्गस्य' (मदर एण्ड चाइल्ड हॉस्पिटल विङ्ग) सञ्चालनाय विविधश्रेणीनां पदानि पूरयिष्यन्ते। हमीरपुर-चिकित्सामहाविद्यालये सहायकाचार्यस्य (असिस्टेण्ट् प्रोफेसर) अष्ट पदानि सह-आचार्यस्य (एसोसिएट् प्रोफेसर) च एकं पदं सृजिष्यते। अपरत्र, सिरमौर-मण्डलस्य उन्नयनं कृते नागरिक-चिकित्सालये हरिपुरधारे अपि आवश्यककर्मचारिणां नियुक्तिः भविष्यति।

आरक्षि-आरक्षक-नियुक्तिरीक्षा अधुना अङ्कनपद्धत्या (ऑफलाइन) भविष्यति

आरक्षि-आरक्षक-नियुक्त्ये (पुलिस कांस्टेबल भर्ती) अभ्यर्थिनः अधिकृत्य अपि मन्त्रिमण्डलेन निर्णयः गृहीतः। वर्तमान नियुक्तये लिखिता परीक्षा आन्तर्जालिकमाध्यमस्य (ऑनलाइन) स्थाने प्रत्यक्ष-लिखित-माध्यमेन (ऑफलाइन) आयोजयिष्यते। एतदर्थं 'हिमाचलप्रदेश-आरक्षिविभाग (आरक्षक-भर्ती) नियमावली-२०२४' इत्यस्य एकादशे नियमे (Rule-11) एकवारस्य विशेषमुक्तेः स्वीकृतिः दत्ता। अपरत्र, हिमाचलप्रदेश-लोकसेवा-आयोगं प्रति आगामिषु षण्मासेषु आन्तर्जालिकपरीक्षाः कारयितुम् आवश्यक-प्रविधिकी-अन्यव्यवस्थाश्च सज्जीकर्तुं कथितम् अस्ति।

विविधसर्वकारीयविभागेषु नूतननियुक्तीनां मार्गः प्रशस्तः

मन्त्रिमण्डलेन अन्येष्वपि बहुषु विभागेषु पदानि पूरयितुं स्वीकृतिः प्रदत्ता। ग्रामीणविकासविभागे कनिष्ठ-कार्यालय-सहायकानां (JOA-IT) विंशतिः (२०) पदानि पूरयिष्यन्ते। प्रदेशस्य विविधेषु न्यायालयेषु आशुलेखक-श्रेणी-तृतीयायाः (स्टेनोग्राफर ग्रेड-III) पञ्चदश (१५) पदानि सृजिष्यन्ते। युवासेवा-क्रीडाविभागे दिव्याङ्गजनानां चतुःप्रतिशतम् (४%) आरक्षणस्य अन्तर्गततया त्रीणि (३) पदानि पूरयिष्यन्ते। कोषागार-लेखा-लॉटरी-विभागे कनिष्ठ-कार्यालय-सहायकानां (JOA-IT) चत्वारि (४) बहुकार्य-कर्मचारिणः (मल्टी टास्क् वर्कर) च एकं पदं सृजितुं स्वीकृतिः लब्धा।

काङ्गड़ा-मण्डले आरक्षिस्थानकं हमीरपुर-चिकित्सामहाविद्यालये च केन्द्रम्

काङ्गड़ा-मण्डलस्य बरूह-आरक्षिचौकीं पूर्ण-आरक्षिस्थानकरूपेण उन्नयनं कर्तुं निर्णयः स्वीकृतः। एतदर्थम् आवश्यकपदान्यपि निर्मीयन्ते। अपरत्र, डॉ. राधाकृष्णन-चिकित्सामहाविद्यालये हमीरपुरे नूतनाम् आरक्षिचौकीं संस्थापयितुमपि मन्त्रिमण्डलेन स्वीकृतिः प्रदत्ता अस्ति।

भारतीय- आरक्षितवित्तकोषेन गृहेषु
धनप्रेषणसम्बन्धिनः एकीकृताः निर्देशाः निर्गताः



हिमसंस्कृतवार्ताः- नवदेहली। भारतीय-आरक्षित- वित्तकोषेन गृहेषु धनप्रेषणस्य सम्बन्धे एकीकृताः निर्देशाः निर्गताः सन्ति। एतेषु निर्देशेषु व्यवहाराणां विद्यमानाः सीमाः यथावत् संरक्षिताः सन्ति, परन्तु नगद-माध्यमेन धनप्रेषणस्य प्रक्रियायां सुरक्षोपायाः अधिकं सुदृढीकृताः सन्ति। एतेषां निर्देशानुसारम्, यस्य कस्यचित् व्यक्तेः वित्तकोषे न विद्यते, सः अपि वित्तकोषशाखां गत्वा एन.ई.एफ.टी. माध्यमेन अन्यस्य कस्यचित् व्यक्तेः वित्तकोषे अधिकतमं पञ्चाशत्-सहस्ररूप्यकाणि प्रेषयितुं शक्नोति।

अनेन निर्देशेन बैंकखाताविहीनानाम् अपि व्यक्तीनां धनप्रेषणस्य सुविधा सुलभा भविष्यति, धनप्रेषणव्यवस्थायां सुरक्षायाः स्तरः अपि वर्धिष्यते

पञ्चचत्वारिंशत्तमस्य भारत- अन्ताराष्ट्रिय-
वाणिज्यमेलायाः उद्घाटनम् अद्य नवदिल्लीस्थे भारतमण्डपे



हिमसंस्कृतवार्ताः- नवदेहली। पञ्चचत्वारिंशत्तमस्य भारत- अन्ताराष्ट्रिय-वाणिज्यमेलायाः उद्घाटनम् अद्य नवदेहलीस्थे भारतमण्डपे भविष्यति। अस्मिन् वर्षे वाणिज्यमेलायाः मुख्यविषयः 'विकासः च धरोहरश्च' इति निर्धारितः अस्ति।अस्मिन् मेलायां नवम्बरमासस्य चतुर्दशदिनाङ्कतः अष्टादशदिनाङ्कपर्यन्तं व्यापारिकदिवसाः भविष्यन्ति। नवम्बरमासस्य एकोनविंशतिदिनाङ्कतः सप्तविंशतिदिनाङ्कपर्यन्तं च मेला सर्वसाधारणजनानां कृते उद्घाटिता भविष्यति। भारतीय- व्यापार- संवर्धनसंस्थानस्य अध्यक्षः जावेद अशरफः वार्तामाध्यमप्रतिनिधिभिः सह सम्भाषणं कुर्वन् अवदत् यत् अस्मिन् वर्षे त्रिषु प्रमुखेषु विषयेषु विशेषं ध्यानं प्रदत्तम् अस्ति। आगन्तुकानाम् अनुभवं सुखदतरं कर्तुं, नूतनाविष्कारान् प्रदर्शयितुं, भारतस्य समृद्धां सांस्कृतिकां धरोहरां च प्रकाशयितुं विशेषाः व्यवस्थाः कृताः सन्ति। तेन सूचितं यत् जनाः पञ्चचत्वारिंशत्तमस्य भारत- अन्ताराष्ट्रिय-वाणिज्यमेलायाः कृते चलदूरभाषीय-अनुप्रयोगस्य माध्यमेन अन्तर्जालद्वारा प्रवेशपत्राणि आरक्षितुं शक्नुवन्ति। अयम् अनुप्रयोगः दिल्ली- महानगर-रेलसेवायाः 'सारथी' इति अनुप्रयोगेन सह सम्बद्धः अस्ति। अस्मिन् वाणिज्यमेलायां विकासस्य, नूतनाविष्काराणां, भारतीय-सांस्कृतिक-वैभवस्य च मनोहरः समन्वयः द्रष्टुं लप्स्यते।

नवदेहल्यां उत्तर-दक्षिण-खण्डयोः 'युगे युगे भारतम्' इति
सङ्ग्रहालयस्य निर्माणाय केन्द्रीय- मन्त्रिमण्डलस्य अनुमोदनम्



हिमसंस्कृतवार्ताः- नवदेहली। केन्द्रीय-मन्त्रिमण्डलेन नवदेहल्यां स्थितयोः ऐतिहासिकयोः उत्तरखण्डस्य दक्षिणखण्डस्य च परिसरे 'युगे युगे भारतम्' इति नाम्नः सङ्ग्रहालयस्य विकासाय अनुमोदनं प्रदत्तम्। अस्याः परियोजनायाः अनुमानिता समग्रव्ययः त्रिसहस्रद्विशताधिक-द्विशतत्रिंशत् कोटिरूप्यकाणि (३,२३० कोटिरूप्यकाणि) अस्ति। अस्याः परियोजनायाः मूल्याङ्कनं सार्वजनिकनिवेशमण्डलेन कृतम् अस्ति।'युगे युगे भारतम्' इति सङ्ग्रहालयः ऐतिहासिकः सभ्यतासम्बद्धः सङ्ग्रहालयः भविष्यति। अस्मिन् सङ्ग्रहालये भारतस्य सभ्यतायाः निरन्तरता, विविधता, समृद्धिः च समग्ररूपेण प्रदर्शयिष्यन्ते। भारतस्य मूर्त-अमूर्त-सांस्कृतिकधरोहरायाः व्यापकं चित्रणम् अपि अत्र भविष्यति। अस्य सङ्ग्रहालयस्य विकासः ऐतिहासिकयोः उत्तरखण्डस्य दक्षिणखण्डस्य च भवनयोः अनुकूलपुनरुपयोगेन क्रियते। अस्मिन् कार्ये भवनयोः वास्तुशिल्पकलायाः वैशिष्ट्यानि ऐतिहासिक- धरोहरायाः महत्त्वं च संरक्ष्य तौ सार्वजनिक-सांस्कृतिक-संस्थारूपेण विकसितौ करिष्येते। अयं सङ्ग्रहालयः भारतस्य गौरवशालिन्याः सभ्यतायाः, सांस्कृतिकवैभवस्य, ऐतिहासिकपरम्परायाश्च परिचायकः भविष्यति

शिक्षकाणां कर्मचारिणां च कृते महत्त्वपूर्णं वृत्तम्!
अष्टमस्य केन्द्रीय-
वेतनायोगस्य सज्जता प्रारब्धा!



हिमसंस्कृतवार्ताः- नवदेहली। देहलीशिक्षानिदेशालयस्य कार्यालयस्य उपनियन्त्रकः (लेखाविभागः) दिनाङ्के द्वादशे नवम्बरमासे, द्विसहस्रषड्विंशतितमे वर्षे, एकं महत्त्वपूर्णं परिपत्रं निर्गतवान्। अनेन परिपत्रेण अष्टमकेन्द्रीयवेतनायोगस्य विचारार्थं शिक्षानिदेशालयस्य अधीनस्थेषु कार्यालयेषु कार्यरतानां कर्मचारिणां विस्तृतविवरणं याचितम् अस्ति।

सङ्कलनीयानि प्रमुखविवरणानि-

१. कर्मचारिणां सङ्ख्या तथा सेवासम्बद्धं विवरणम्।
२. वेतनस्य भत्तानां च विस्तृतं विवरणम्।
३. निवृत्तिवेतनसम्बद्धं विवरणम्।
४. सामान्यभविष्यनिधेः (GPF) अन्यवित्तीयसुविधानां च विवरणम्।
५. सुनिश्चितवृत्त्युत्कर्षयोजनायाः (MACP) वित्तीयपदोन्नतेः च विवरणम्।
६. अग्रिमधनराशेः प्रतिपूर्तेश्च विवरणम्।
७. संविदाधारितकर्मचारिणां परामर्शदातृणां च विवरणम्।

सर्वेभ्यः सम्बन्धिताधिकारिभ्यः निर्दिष्टप्रारूपेण सूचनाः मुद्रितप्रतिरूपेण, सङ्गणकीयप्रतिरूपेण च उपलब्धाः कारयितुं निर्देशाः प्रदत्ताः सन्ति। अष्टमकेन्द्रीयवेतनायोगस्य कृते क्रियमाणा इयं प्रक्रिया कर्मचारिणां वेतनस्य, भत्तानां, निवृत्तिवेतनस्य, अन्यासां वित्तीयसुविधानां च पुनरीक्षणदृष्ट्या महत्त्वपूर्णा अस्ति। आशास्यते यत् अष्टमः केन्द्रीयवेतनायोगः कर्मचारिणां हितं सम्यग् विचार्य उत्तमवेतनमानस्य विविधसुविधानां च विषये हितकराः अनुशंसाः करिष्यति।



संस्कृत-हास्य-कणिका

हिमाचलप्रदेशे हिमवृष्टिः शिंकुला- बारालाचा- कुंजुम- मार्गाः पिहिताः, बहूनां मार्गाणां यातायातं स्तब्धम्



हिमसंस्कृतवार्ताः- कुल्लू। जनजातीयमण्डले लाहौल- स्पीत्युच्चप्रदेशेषु सातत्येन जायमानाया हिमवृष्ट्याः कारणात् बहवः मुख्याः मार्गाः यानानाम् गमनागमनाय पिहिताः कृताः। शिंकुला- मार्गः, बारालाचामार्गः, कुंजुमशिखरं च प्रभृतीनाम् उच्चप्रदेशानां मार्गाः यानानां गमनाय असुरक्षिताः जाताः। मौससस्य मार्गस्य च स्थितिं विलोक्य आरक्षकेण सावतधानतया एतेषु मार्गेषु यातायातं स्थगिताः।

बहूनि स्थानानि १० तः १५ सेन्टीमीटर-मितं हिमवृष्टिः संचिता

लाहौल-घाटीमध्ये रोहतांग-मार्गात् उदयपुरं यावत् मनाली-लेहमार्गे च गुरुवासरस्य रात्र्याः आरभ्य अविरतम् हिमवृष्टिः भवति। सातत्येन जायमानेन हिमेन बहुषु स्थानेषु १० तः १५ सेन्टीमीटर-पर्यन्तं हिमं संचितम् अस्ति। अनेन मार्गयोः स्रंसनम् वर्धितम्, यानानां गमनागमनं च संकटपूर्णम् जातम्। उच्चप्रदेशेषु मौसमः निरन्तरं परिवर्तते। एवं स्थिते आरक्षकप्रशासनं सुरक्षां प्राथम्यं दत्त्वा मुख्यमार्गान् प्रति गच्छन्ताम् यानानां मार्गम् अवरुद्धवत्।

घाट्यां बस-सेवायाम् अपि प्रभावः

हिमवृष्ट्याः प्रभावः लाहौल-घाट्याः आभ्यन्तरे सञ्चालितानां बस-सेवानाम् उपरि अपि जातः। बहवः बसमार्गाः प्रभाविताः जाताः। मार्गेषु हिमसंचयेन संस्रनकारणात् च यानानां सञ्चालनं दुष्करं जातम्।

पर्यटकाः स्थानीयजनाः च यात्रातः दूरीभवनस्य परामर्शः

मण्डलप्रशासनेन पर्यटकाः स्थानीयजनाः च यावत् मौसमः सामान्यः न भवति, तावत् उच्चप्रदेशानां यात्रातः दूरीभवितुं परामर्शः दत्तः। विशेषतः शिंकुला-मार्गं, बारालाचा-मार्गं, कुंजुम-शिखरं च प्रति गच्छन्तः जनाः सावतधानाः भवितुम् उक्ताः। प्रशासनस्य पक्षतः जनैः अनुरोधः कृतः यत् ते मार्गस्य मौसमस्य च स्थित्याः सम्यक् ज्ञात्वा एव यात्रायाः योजनां कुर्वन्तु। हिमवृष्टेः समये संकटं स्वीकृत्य उच्चप्रदेशेषु गमनं कष्टकारणं भवितुम् अर्हति।

लखनऊनगरे ग्रामीणस्वच्छताग्राहिणाम् अनिश्चितकालीनं धरना-प्रदर्शनम् अनुवर्तते



निश्चितमानधनस्य नियमितकार्यस्य च मागं पूरयितुं दृढनिश्चयः, दीपोत्सवमपि धरनास्थले एव आचरिष्यन्ति आन्दोलनकारिणः।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः लखनऊ। ग्रामीणस्वच्छताग्राहिणां दीर्घकालीनानां लम्बितमागानां समर्थनार्थं राजधानीलखनऊस्थे ईकोगार्डननामके धरनास्थले शुक्रवासरेऽपि अनिश्चितकालीनं धरना-प्रदर्शनम् अनुवर्तते। प्रदेशस्य विभिन्नजनपदेभ्यः समागताः ग्रामीणस्वच्छताग्राहिणः स्वमागानां समर्थनार्थं निरन्तरम् आन्दोलनं कुर्वन्ति। आन्दोलनकारिणां कथनमस्ति यत् यावत् शासनं तेषां मागानां विषये विचारं कृत्वा सकारात्मकं निर्णयं न स्वीकरोति, तावत् ते धरनास्थलात् गृहं न प्रतिगमिष्यन्ति। मागानां पूर्त्यभावे दीपोत्सवमपि धरनास्थले एव आचरिष्यामः इति आन्दोलनकारिणः उद्घोषितवन्तः।

ग्रामीण- स्वच्छता- ग्राहीकर्मचारिसङ्घटनेन मुख्यमन्त्रिणे योगी आदित्यनाथाय ज्ञापनपत्रं प्रेष्य अस्मिन् विषये हस्तक्षेपं कर्तुं प्रार्थना कृता अस्ति। ज्ञापनपत्रे ग्रामीणस्वच्छताग्राहिणः संसाधनपुनर्प्राप्तिकेन्द्रेषु (आर.आर.सी.) नियुक्त्य नियमितकार्यं प्रदातुं प्रतिमासं निश्चितं मानधनं च सुनिश्चितं कर्तुं प्रमुखतया आग्रहः कृतः अस्ति। सङ्घटनेन प्रेषिते पत्रे उल्लिखितमस्ति यत् पूर्वं लखनऊस्थे ईकोगार्डनधरनास्थले जिलापञ्चायतराजाधिकारेण हिमांशुशेखरठाकुरेण सह सङ्घटनस्य प्रतिनिधिमण्डलस्य वार्ता अभवत्। तस्मिन् समये सर्वेभ्यः ग्रामीणस्वच्छताग्राहिभ्यः आर.आर.सी. केन्द्रेषु नियुक्तिं प्रदाय नियमितकार्यं कारयितुं समुचितं मानधनं च दातुम् आश्वासनं प्रदत्तम् आसीत्। आश्वासनं प्राप्त्वा सङ्घटनेन पूर्वं धरना- प्रदर्शनम् समाप्तम् आसीत्। वर्तमानकाले धरनां कुर्वतां स्वच्छताग्राहिणां कथनमस्ति यत् ते दीर्घकालात् स्वमागानां पूर्तये सङ्घर्षं कुर्वन्तः सन्ति, किन्तु अद्यावधि कोऽपि ठोसः समाधानः न जातः। शुक्रवासरेऽपि धरनास्थले समागतैः आन्दोलनकारिभिः स्पष्टं कृतं यत् यावत् तेषां मागानां विषये ठोसः निर्णयः न भवति, तावत् तेषाम् अनिश्चितकालीनम् आन्दोलनम् अविरतं प्रचलिष्यति। आवश्यकतायां ते स्वपरिवारात् दूरे स्थित्वा दीपोत्सवपर्वमपि ईकोगार्डनधरनास्थले एव आचरिष्यन्ति।




उत्तरप्रदेशस्य क्रीडाजगति गौरववर्धनम्,

प्रतिष्ठितैः क्रीडाप्रशिक्षकैः क्रीडिकया च राष्ट्रियपुरस्कारैः सम्मानितैः प्रदेशस्य गौरववृद्धिः

हिमसंस्कृतवार्ताः- नवदेहली। नवदेहल्यां माननीयराष्ट्रपतिना द्रौपदीमुर्मुमहोदयया 'द्रोणाचार्य- जीवनपर्यन्तपुरस्कारः- २०२५' इति प्रतिष्ठितेन सम्मानेन सम्मानिताय उत्तरप्रदेशस्य प्रख्याताय मुक्केबाजीप्रशिक्षकाय धर्मेन्द्रसिंहयादवमहोदयाय हार्दिक्यः शुभकामनाः। तथैव 'द्रोणाचार्यपुरस्कारः- २०२५' इति सम्मानेन सम्मानिताय प्रख्याताय मुक्केबाजीप्रशिक्षकाय श्रीछोटेलाल यादवमहोदयाय, 'अर्जुनपुरस्कारः- २०२५' इति सम्मानेन सम्मानितायै उत्तरप्रदेशस्य गौरवभूतायै प्रख्यातायै धाविकायै सुश्रियै प्रियङ्कागोस्वामिने च हार्दिक्यः वर्धापनाः।एषा उपलब्धिः सम्पूर्णस्य उत्तरप्रदेशस्य क्रीडाक्षेत्रस्य कृते गौरवस्य विषयः अस्ति। भवतां सर्वेषां समर्पणभावः, कठिनपरिश्रमः, क्रीडाक्षेत्रे च अमूल्यं योगदानम् आगामिन्यः पीढ्यः निरन्तरं प्रेरयिष्यति। भवद्भ्यः सर्वेभ्यः उज्ज्वलभविष्याय निरन्तरसफलतायै च हार्दिक्यः मङ्गलकामनाः।

जनगणना-२०२७ इत्यस्मिन् संस्कृतभाषायाः समुचितम् अभिलेखनं व्यापकजनजागरूकता च इत्येतदर्थं समस्तान् संस्कृतानुरागिनः प्रति आह्वानम्



(प्रो. बिहारी लाल शर्मा)
कुलपतिः, सम्पूर्णानन्द संस्कृत वि.वि. वाराणसी

संस्कृतस्य गौरवं भारतस्य गौरवम् अस्ति। संस्कृतस्य संरक्षणम् अस्माकं सांस्कृतिक्याः अस्मितायाः, सभ्यतागतस्मृतेः ज्ञानपरम्परायाः च संरक्षणम् अस्ति। आगच्छन्तु, जनगणना-२०२७ इत्यत्र संस्कृतस्य वास्तविकां भाषायीम् उपस्थितिं समुचितरूपेण अभिलिखितुं वयं सर्वे स्वकीयां सक्रियां सहभागितां सुनिश्चितं कुर्मः। आदरणीयाः संस्कृतविद्यायाः अनन्योपासकाः, भारतीय- ज्ञान-परम्परायाः प्रतिष्ठिताः साधकाः, आचार्याः, प्राध्यापकाः, शिक्षकवृन्दाः, शोधार्थिनः, विद्यार्थिनः, संस्कृतानुरागिनः महानुभावाः च! सादरम् अभिवादनम्।

भारतस्य सनातन- सांस्कृतिकचेतनायाः, ज्ञान-विज्ञानयोः समृद्धपरम्परायाः, आध्यात्मिकचिन्तनस्य च अक्षयनिधिः संस्कृतभाषा अस्माकं राष्ट्रियास्मितायाः अमूल्यः आधारः अस्ति। इयं केवलं संवादस्य माध्यमं नास्ति, अपि तु भारतीयसभ्यतायाः आत्मा, सांस्कृतिकस्मृतीनां संवाहिका, ज्ञानस्य अनन्तसम्भावनानाम् अक्षयस्रोतः च अस्ति। वेदानाम् उपनिषदां च उदात्तचिन्तनात् आरभ्य रामायण-महाभारतयोः जीवनादर्शपर्यन्तम्, आयुर्वेद- ज्योतिष- गणित- व्याकरण- साहित्य- दर्शन- विविधशास्त्राणां विपुलज्ञानराशिपर्यन्तं भारतीयमनीषायाः अप्रतिमं बौद्धिकवैभवं संस्कृते संरक्षितम् अस्ति। सहस्राब्देभ्यः इयं भाषा भारतस्य चिन्तनं, चरित्रं, चेतनां सांस्कृतिकजीवनं च दिशं प्रददाति।

संस्कृतस्य महत्त्वं केवलं तस्य गौरवशालिनि अतीते एव सीमितं नास्ति; तस्य वर्तमानप्रासङ्गिकता भविष्यत्सम्भावनाः च तावत्यः एव व्यापकाः महत्त्वपूर्णाः च सन्ति। अद्य देशस्य विश्वविद्यालयेषु, महाविद्यालयेषु, गुरुकुलेषु, पारम्परिक-शिक्षणसंस्थानेषु च संस्कृतस्य अध्ययनम् अध्यापनं, शास्त्राणाम् अनुशीलनं, भारतीयज्ञानपरम्परायाः च विविधायामेषु अनुसन्धानं निरन्तरं गतिशीलम् अस्ति। समाजे संस्कृतं प्रति वर्धमाना रुचिः तस्याध्ययनस्य विस्तृततराः आयामाः च अस्याः भाषायाः जीवन्ततायाः कालजयीप्रासङ्गिकतायाः च प्रमाणानि सन्ति। अस्मिन् एव परिप्रेक्ष्ये आगामिनी जनगणना- २०२७ अस्माकं सम्मुखे संस्कृतस्य वास्तविकां भाषायीम् उपस्थितिं राष्ट्रियस्तरे समुचितरूपेण अभिलिखितुम् एकं महत्त्वपूर्णम् अवसरं प्रस्तौति। जनगणना केवलं जनसङ्ख्यायाः साङ्ख्यिकीयं विवरणं नास्ति, अपि तु राष्ट्रस्य सामाजिक- भाषायी- सांस्कृतिक- संरचनायाः प्रामाणिकः अभिलेखः अपि भवति। अतः जनगणनायां संस्कृतस्य वास्तविकस्य मातृभाषायीज्ञानस्य अन्यभाषायीज्ञानस्य च यथोचितम् अभिलेखनं सुनिश्चितं करणम् अस्माकं सर्वेषां सामूहिकं दायित्वम् अस्ति। सम्पूर्णानन्द-संस्कृत- विश्वविद्यालयस्य, वाराणस्याः कुलपतिरूपेण अहं देशस्य समस्तान् संस्कृतस्नातक- परास्नातक- आचार्य- शिक्षक-प्राध्यापक- शोधार्थि- विद्यार्थि- संस्कृतसेविनः सहितं संस्कृतभाषाज्ञानयुक्तान् सर्वान् महानुभावान् हार्दम् आह्वयामि यत् ते जनगणना-२०२७ इत्यस्य अवसरे स्वकीयवास्तविकभाषायीस्थित्यनुसारं संस्कृतस्य उल्लेखम् अवश्यं सुनिश्चितं कुर्वन्तु।

येषां मातृभाषा संस्कृतम् अस्ति, ते मातृभाषारूपेण संस्कृतस्य उल्लेखं कुर्वन्तु तथा येषां संस्कृतस्य ज्ञानम् अस्ति, ये च एतां पठितुं, लेखितुं, वक्तुम् अथवा अवगन्तुं शक्नुवन्ति, ते स्वकीयासु अन्यज्ञातभाषासु संस्कृतमपि समावेशयन्तु। अयम् उल्लेखः प्रत्येकस्य व्यक्तेः वास्तविकभाषायीज्ञाने परिचये च आधारितः भवेत्। अस्माकम् उद्देश्यं केनापि प्रकारेण सङ्ख्यानां कृत्रिमरूपेण वर्धनं नास्ति, अपि तु संस्कृतस्य वास्तविक-भाषायीस्वरूपस्य तज्ज्ञानवतां जनानाम् उपस्थितेः च प्रामाणिकतया राष्ट्रिय-अभिलेखेषु प्रतिष्ठापनम् अस्ति। अस्य पुनीतोद्देश्यस्य व्यापकसाफल्याय देशस्य समस्त- संस्कृत- विश्वविद्यालयान्, सम्बद्ध- संस्कृत- महाविद्यालयान्, संस्कृत-विद्यालयान्, गुरुकुलानि, पारम्परिक- पाठशालाः, संस्कृतशिक्षकसङ्गठनानि, शोधसंस्थानानि तथा संस्कृतेन सम्बद्धानि सामाजिक- सांस्कृतिक-सङ्गठनानि प्रति मम विशेषः आग्रहः अस्ति यत् ते इमम् उपक्रमं व्यापकजनजागरूकता-अभियानस्य स्वरूपं प्रददतु। सर्वाणि संस्थानानि स्वशिक्षकान्, विद्यार्थिनः, पूर्वविद्यार्थिनः, शोधार्थिनः अभिभावकान् च जागरूकान् कुर्वन्तु। संस्कृतस्य प्रत्येकः आचार्यः अध्यापकः च इमं सन्देशं स्वसम्पर्कक्षेत्रपर्यन्तं प्रापयतु तथा प्रत्येकः संस्कृतज्ञः स्वपरिवारं, परिचितान् समाजस्य च अन्यान् संस्कृतानुरागिनः अस्मिन् दिशि प्रेरयतु। विश्वविद्यालयाः संस्थाः च स्वसूचनापट्टैः, शैक्षणिकायोजनैः, सङ्गोष्ठीभिः, उपवेशनैः सामाजिकमाध्यमैः च अस्याः अभ्यर्थनायाः व्यापकं प्रचारं प्रसारं च सुनिश्चितं कुर्वन्तु। अस्माभिः इदं स्मर्तव्यं यत् कस्यापि भाषायाः प्रतिष्ठा केवलं तस्याः प्राचीनसाहित्येन, शास्त्रीयवैभवेन ऐतिहासिकमहत्त्वेन च न, अपि तु तस्याः वर्तमानभाषायी- अस्तित्वेन, सामाजिकोपस्थित्या भाविपीढीपर्यन्तं तस्याः निरन्तरतया अपि सुनिश्चिता भवति। संस्कृतं केवलं श्रद्धायाः गौरवस्य च विषयः मन्तव्यः इति पर्याप्तं नास्ति; अपि तु जीवने, शिक्षायाम्, अनुसन्धाने, संवादे व्यवहारे च तस्य निरन्तरं प्रतिष्ठापनम् अपि अस्माकम् उत्तरदायित्वम् अस्ति। जनगणना-२०२७ इत्यस्मिन् तस्य यथार्थपरकं समुचितं च अभिलेखनम् अस्मिन् एव दिशि एकं महत्त्वपूर्णं पदम् अस्ति। आगच्छन्तु, वयं सर्वे मिलित्वा इमम् अवसरं संस्कृतं प्रति स्वगौरवबोधं जागरयितुं, तस्य वास्तविकां भाषायीम् उपस्थितिं राष्ट्रियस्तरे अभिलिखितुं, भारतीयज्ञानपरम्परायाः अमूल्यनिधिं भाविपीढीभ्यः समर्पयितुं च सामूहिकसङ्कल्पे परिणमामः। संस्कृतं केवलम् अस्माकम् अतीतस्य गौरवं नास्ति, अपि तु वर्तमानस्य सांस्कृतिक-चेतनायाः भविष्यतः ज्ञानसम्भावनानां च सशक्तः आधारः अपि अस्ति। अनेन एव विश्वासेन भवतः सर्वान् पुनः प्रार्थये यत् जनगणना-२०२७ इत्यत्र स्वकीय- वास्तविक- भाषायीस्थित्यनुसारं संस्कृतस्य उल्लेखं सुनिश्चितं कुर्वन्तु तथा अस्मै जागरूकता-अभियानाय राष्ट्रव्यापिजनभागीदार्याः स्वरूपं प्रदातुं स्वकीयं सक्रियं सार्थकं च योगदानं यच्छन्तु। आगच्छन्तु, संस्कृतस्य गौरवं स्वकीयां परिचितिं कुर्मः, स्वज्ञानपरम्परायै सम्मानं दद्मः, स्वसांस्कृतिकविरासतः संरक्षणाय संवर्धनाय च सङ्कल्पबद्धाः भवामः। सादरशुभेच्छाभिः सह।

गणवेशाभावे कक्षाप्रवेशः निषिद्धः! वाई.डी. महाविद्यालयस्य बहिः अध्ययनं कर्तुं बाध्याः छात्राः

पञ्चदिनानन्तरं परीक्षाः, अपूर्णश्च पाठ्यक्रमः; आर्थिकदृष्ट्या दुर्बलाः विद्यार्थिनः समस्याग्रस्ताः।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखीमपुरखीरी। महाविद्यालये गणवेशस्य अनिवार्यता निर्धनानां आर्थिकदृष्ट्या दुर्बलानां च विद्यार्थिनां शिक्षणे बाधाम् उत्पादयति। पलियातः गोलातः च दीर्घमार्गं पारयित्वा महाविद्यालयम् आगताः केचन विद्यार्थिनः गणवेशाभावात् कक्षासु प्रवेशं न प्राप्तवन्तः। अतः बाध्याः ते महाविद्यालयस्य बहिः एव उपविश्य अध्ययनं कृतवन्तः। आश्चर्यस्य विषयः अस्ति यत् केवलं पञ्चदिनानन्तरं परीक्षाः प्रारभ्यन्ते, किन्तु विद्यार्थिनां कथनानुसारम् अद्यापि पाठ्यक्रमः पूर्णतया न समाप्तः। विद्यार्थिनां प्रमुखा मागः अस्ति यत् गणवेशस्य कारणेन तेषाम् अध्ययनं न अवरुध्येत। आर्थिकदृष्ट्या दुर्बलानां विद्यार्थिनां कृते विशेषा सुविधा प्रदीयेत, परीक्षाभ्यः पूर्वम् अतिरिक्तकक्षाः सञ्चाल्य अपूर्णः पाठ्यक्रमः शीघ्रं सम्पूर्येत। प्रश्नः अयं वर्तते यत् महाविद्यालयस्य प्राथमिकता गणवेशः अस्ति उत विद्यार्थिनां भविष्यस्य संरक्षणम्?



विधानसभाक्षेत्राणां निर्वाचकनामावल्यानां विशेषसंक्षिप्तपुनरीक्षणस्य सज्जतासम्बन्धिनी

वीडियोसम्भाषणगोष्ठी सम्पन्ना



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, जनपदम्। अद्य दिनाङ्के २०२६ तमस्य वर्षस्य नवम्बरमासस्य त्रयोदशे (१३.११.२०२६) विधानसभाक्षेत्राणां छायाचित्रयुक्तानां निर्वाचकनामावल्यानां विशेष-संक्षिप्तपुनरीक्षणस्य सज्जतासम्बन्धे उत्तरप्रदेशस्य मुख्यनिर्वाचनाधिकारिणः अध्यक्षतायाम् आयोजितायां दृश्यश्रव्य- सम्भाषणगोष्ठ्यां एन. आई. सी. सभागारे उपस्थितिः अभवत्।

अस्याः गोष्ठ्याः प्रमुखम् उद्देश्यम् निर्वाचकनामावल्यानां विशेषसंक्षिप्त-पुनरीक्षणकार्यस्य सुचारुसम्पादनाय आवश्यकानां पूर्वसज्जतानां समीक्षा, कार्ययोजनायाः निर्धारणं तथा सम्बन्धितविभागानां मध्ये समन्वयस्थापनं च आसीत्। गोष्ठ्यां निर्वाचनसम्बद्धकार्याणां समयबद्धं, पारदर्शि, व्यवस्थितं च सम्पादनं सुनिश्चितकर्तुं आवश्यकविषयेषु विचारविमर्शः कृतः।

कृषिभवने स्थिते छठघाटे व्रतिनां कृते समुचितसुविधाः सुनिश्चितं करोति कृषिविभागः

लोकश्रद्धायाः महापर्वणि व्रतिनां सुविधानां सुरक्षा च सर्वोच्चप्राथमिकता — कृषिमन्त्रिणा विजयकुमारसिन्हेन छठघाटस्य निरीक्षणं कृतम्



सूर्योपासना, प्रकृतेः सम्मानम् अन्नदातुः सत्कारश्च

छठमहापर्व अस्माकं कृषिपरम्परायाः लोकश्रद्धायाश्च अनुपमः समन्वयः- विजयकुमारसिन्हः।

हिमसंस्कृतवार्ताः- राघव नाथ झा, पटना, राज्यस्य कृषिमन्त्री विजयकुमारसिन्हः अद्य मीठापुरस्थितस्य कृषिभवनस्य छठघाटस्य निरीक्षणं कृत्वा छठमहापर्वणि व्रतिनां श्रद्धालूनां च कृते क्रियमाणानां व्यवस्थाणां समीक्षाम् अकरोत्। अस्मिन्नवसरे तेन घाटस्य स्वच्छतायाः, सुरक्षायाः, शुचितायाः अन्यासां च आवश्यकसुविधानां स्थितेः निरीक्षणं कृतम्।

निरीक्षणसमये कृषिमन्त्री घाटस्य स्वच्छताव्यवस्थां विशेषतया सुदृढां कर्तुं सम्बन्धिताधिकारिभ्यः निर्देशम् अददात्। सः अवदत् यत् लोकश्रद्धायाः महापर्वणि छठपूजायां स्वच्छतायाः पवित्रतायाश्च विशेषं महत्त्वम् अस्ति। अतः घाटस्य तदनुवर्तिनः परिसरस्य च नियमितस्वच्छता सुनिश्चिता करणीया। श्रद्धालूनाम् आवागमनमार्गाः अपि स्वच्छाः सुरक्षिताश्च रक्षणीयाः। सः सम्बन्धिताधिकारिणः निर्दिष्टवान् यत् छठव्रतिनां सुविधायै सुरक्षायै च सर्वथा विशेषं ध्यानं दीयताम्। घाटम् आगच्छतां श्रद्धालूनां कृते काऽपि असुविधा न भवेत्, एतदर्थम् आवश्यकाः सर्वाः व्यवस्थाः समयात् पूर्वमेव सुनिश्चिताः करणीयाः। सः अवदत् यत् छठमहापर्व अस्माकम् आस्थायाः, परम्परायाः, प्रकृतेः स्वच्छतायाश्च प्रतीकम् अस्ति। अस्मिन् पावने पर्वणि व्रतिभ्यः शान्तं सुरक्षितं स्वच्छं च वातावरणं प्रदातुं सर्वेषाम् उत्तरदायित्वम् अस्ति। सर्वे सम्बन्धिताः पदाधिकारिणः परस्परसमन्वयेन पूर्णतत्परतया स्वकीयानि दायित्वानि निर्वहन्तु, येन श्रद्धालवः पूर्णश्रद्धया भक्तिभावेन च भगवान् सूर्यं प्रति अर्घ्यं समर्पयितुं शक्नुयुः।

तेन पुनः उक्तं यत् छठमहापर्व लोकश्रद्धायाः, प्रकृतेः प्रति कृतज्ञतायाः, समृद्धकृषिसंस्कृतेश्च अद्भुतः सङ्गमः अस्ति।

संस्कृताध्ययनेन वृत्तेः नवीनाः सम्भावनाः उद्घाटिताः

गाजोलमहाविद्यालये विशेषः वृत्तिपरामर्शकार्यक्रमः सम्पन्नः। त्रयाणां महाविद्यालयानां सप्ततिः छात्रछात्राः उत्साहेन समुपस्थिताः

विलास महलदारः ,गाजोलम्

प्राचीनभारतीयज्ञानपरम्परायाः अमृतमयी धारा संस्कृतभाषा न केवलम् अतीतस्य गौरवमयी धरोहरः, अपितु वर्तमानस्य भविष्यतश्च वृत्यवसराणां सम्भावनापूर्णः उज्ज्वलः मार्गः अपि अस्ति। एष एव सन्देशः गाजोलमहाविद्यालयस्य प्राङ्गणे आयोजिते विशेषे वृत्तिपरामर्शकार्यक्रमे प्रतिध्वनितः अभवत्। संस्कृतभाषायाः साहित्यस्य च अध्ययनस्य सह उच्चशिक्षायां, अनुसन्धानक्षेत्रे तथा वृत्तिजीवने विद्यमानानां विविधसम्भावनानां विषये छात्रछात्रान् जागरूकान् कर्तुं त्रयोदशे नवम्बर्-मासस्य शुक्रवासरे महाविद्यालयस्य संस्कृतविभागस्य प्रयत्नेन अयं विशेषः कार्यक्रमः आयोजितः। अस्मिन् कार्यक्रमे मुख्यवक्तृत्वेन विशिष्टातिथित्वेन च संस्कृतभारत्याः त्रिपुराप्रान्तस्य माननीयः प्रान्तमन्त्री श्रीविक्रमविश्वासमहोदयः समुपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षस्थानम् अलङ्कृतवान् गाजोलमहाविद्यालयस्य माननीयः प्राचार्यः डॉ. मनोजकुमारभोजमहोदयः। प्रधानातिथिरूपेण महाविद्यालयस्य बङ्गलाविभागस्य विभागाध्यक्षः प्राध्यापकः डॉ. अमरचन्द्रकर्मकारमहोदयः उपस्थितः आसीत्। अपि च संस्कृतविभागस्य विभागाध्यक्षः प्राध्यापकः डॉ. अनिमेषमण्डलमहोदयः, प्राध्यापिका सङ्घमित्रासरकारमहोदया, प्राध्यापकः डॉ. प्रियरञ्जन-दाशमहोदयः, प्राध्यापकः डॉ. गौराङ्गदेववर्ममहोदयः, इतिहासविभागस्य विभागाध्यक्षः प्राध्यापकः जयगोपालसिंहमहोदयः तथा बिलासमहलदारमहोदयः प्रभृतयः विशिष्टाः जनाः समुपस्थिताः आसन्।गाजोलमहाविद्यालयस्य, पाकुआहाट्-डिग्री-महाविद्यालयस्य तथा सामसी-महाविद्यालयस्य संस्कृतविभागेभ्यः प्रायः सप्ततिः छात्रछात्राः अस्मिन् कार्यक्रमे भागम् अगृह्णन्। त्रयाणां महाविद्यालयानां छात्रछात्राणाम् एकत्रितया उपस्थित्या अयं कार्यक्रमः अन्तर्महाविद्यालयीयशैक्षिकविचारविनिमयस्य सुन्दरः समन्वयः अभवत्। कार्यक्रमस्य मुख्याकर्षणम् आसीत् श्रीविक्रमविश्वासमहोदयस्य सुविचारपूर्णं मार्गदर्शनात्मकं च भाषणम्। सः संस्कृतभाषायाः अध्ययनानन्तरम् उच्चशिक्षायां तथा वृत्तिक्षेत्रे विद्यमानानां विविधावसराणां विषये विस्तरेण प्रकाशम् अकरोत्। विशेषतः शिक्षाक्षेत्रे, अध्यापने, अनुसन्धानकार्ये, अनुवादकर्मणि, पाण्डुलिपिसंरक्षणे, संस्कृतशिक्षायां, संस्कृतभाषायाः प्रचारप्रसारकार्ये तथा विभिन्नेषु सर्वकारीयेषु असर्वकारीयेषु च संस्थानेषु उपलब्धानां वृत्यवसराणां विषये सः विस्तरेण विवेचितवान्। तदतिरिक्तं विविधासु प्रतियोगितापरीक्षासु सहभागितायाः, आवश्यकयोग्यतानाम् अर्जनस्य तथा भविष्यस्य वृत्तिजीवनस्य समुचितयोजनायाः विषये छात्रछात्रेभ्यः बहुमूल्यानि परामर्शवचनानि प्रदत्तवान्।तस्य भाषणे विशेषतया इदम् उद्भावितम् यत् संस्कृतभाषा केवलं परीक्षोत्तीर्णतायाः विषयः इति न मन्तव्यम्; अपितु अस्याः भाषायाः अन्तर्निहितं ज्ञानभाण्डारम्, वैज्ञानिकचिन्तनम्, दर्शनम्, साहित्यं तथा सांस्कृतिकपरम्परां सम्यग् अवगन्तव्यम्। आधुनिकप्रौद्योगिक्या अनुसन्धानकार्येण च सह संस्कृताध्ययनस्य समन्वयं विधाय कथं नवीनानां वृत्तिक्षेत्राणाम् अन्वेषणं कर्तुं शक्यते, अस्मिन् विषये अपि सः छात्रछात्रान् प्रोत्साहितवान्। तस्य प्रेरणादायकैः विचारैः छात्रछात्राणां मनसि आत्मविश्वासस्य, आशावादस्य तथा भविष्यनिर्माणस्य नवीनः उत्साहः सञ्चारितः।कार्यक्रमस्य अध्यक्षः प्राचार्यः डॉ. मनोजकुमारभोजमहोदयः स्वकीयसम्बोधने छात्रान् उद्दिश्य अवदत् यत् शिक्षायाः वास्तविकं साफल्यं केवलं पदवीप्राप्तौ न निहितम्, अपितु अर्जितज्ञानस्य जीवनस्य व्यावहारिकक्षेत्रे प्रयोगे एव तस्य वास्तविकं मूल्यं विद्यते। सः संस्कृतभाषायाः ऐतिहासिकं, दार्शनिकं तथा सांस्कृतिकं महत्त्वम् उल्लिख्य छात्रान् निष्ठया परिश्रमेण च अस्याः भाषायाः अध्ययनं निरन्तरं कर्तुम् आहूतवान्।

प्रधानातिथिः प्राध्यापकः डॉ. अमरचन्द्रकर्मकारमहोदयः अपि स्वकीयसम्बोधने भाषाशिक्षायाः महत्त्वं तथा बहुविधज्ञानार्जनस्य आवश्यकतां प्रतिपादितवान्।

सम्राट् परीक्षितेन कलियुगाय निवासार्थं प्रदत्तानि पञ्च स्थानानि



धर्मस्य रक्षणाय पृथिव्याः संरक्षणाय च सम्राट् परीक्षितस्य दृढः संकल्पः।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, हस्तिनापुरम्। श्रीमद्भागवतपुराणस्य प्रथमस्कन्धे वर्णिते प्रसङ्गे सम्राट् परीक्षित् धर्मस्य पृथिव्याश्च रक्षणाय कलियुगस्य दमनार्थं स्वखड्गम् उद्यम्य तं हन्तुम् उद्यतः अभवत्। सूतजीः शौनकमुनिं कथयति यत् एकदा सम्राट् परीक्षित् दिग्विजययात्रायां राजवेषधारिणं शूद्रं दृष्टवान्। सः दण्डेन वृषभं धेनुं च निर्दयतया प्रहरति स्म। वृषभः एकेनैव पादेन स्थितः भयेन कम्पमानः आसीत्। सः शूद्रस्य प्रहारैः पीडितः आसीत्। धेनुः अपि दुर्बला, वत्सविरहिता, क्षुधया पीडिता च आसीत्। तस्याः नेत्राभ्यां अश्रूणि पतन्ति स्म। एतादृशं करुणाजनकं दृश्यम् अवलोक्य महाराजः परीक्षित् क्रुद्धः अभवत्। सः धनुः सज्जीकृत्य गम्भीरस्वरेण तम् अवदत्- 'अरे दुष्ट! मम राज्ये निरपराधान् दुर्बलान् प्राणिनः किमर्थं पीडयसि? राजवेषं धृत्वा अधर्माचरणं करोषि। अतः त्वं दण्डनीयः असि।'

ततः सः वृषभं धेनुं च सान्त्वयन् अभवत्। धर्मस्वरूपं वृषभं सम्बोध्य तस्य दुःखस्य कारणं पृष्टवान्। वृषभः धर्मस्य प्रतीकः आसीत् तथा धेनुः साक्षात् पृथिवी आसीत्। धर्मदेवः राज्ञे अवदत् यत् दुःखस्य कारणविषये विद्वांसः विविधमतानि धारयन्ति। केचन आत्मानं, केचन प्रारब्धकर्म, अन्ये स्वभावम्, अपरे च ईश्वरं दुःखस्य कारणं मन्यन्ते। अतः दुःखस्य वास्तविकं कारणं निश्चितरूपेण वक्तुं कठिनम् अस्ति।तदा राजा परीक्षित् उक्तवान् यत् सत्ययुगे धर्मस्य चत्वारः पादाः आसन्- तपः, शौचम्, दया, सत्यम् च। किन्तु कलियुगस्य प्रभावात् गर्वः, आसक्तिः, मदः च धर्मस्य त्रयः पादान् नाशितवन्तः। अधुना केवलं सत्यरूपः चतुर्थः पादः अवशिष्टः अस्ति।राजा परीक्षित् धर्मं पृथिवीं च सान्त्वयित्वा अधर्मस्य मूलकारणं कलियुगं हन्तुं तीक्ष्णं खड्गम् उद्यम्य अभवत्। भयभीतः कलिः तत्क्षणमेव स्वराजचिह्नानि अपसार्य राज्ञः चरणयोः शरणम् अगच्छत्। शरणागतवत्सलः सम्राट् परीक्षित् तं न जघान, अपितु अवदत्- 'मम राज्ये अधर्मस्य सहायकस्य तव निवासः न अनुमतः। त्वया जनानां मध्ये लोभः, असत्यं, चोरी, कपटं, कलहः, दम्भः च प्रवर्ध्यन्ते।' तदा कलियुगः करबद्धः भूत्वा राजानम् अपृच्छत्- 'हे राजन्! भवतः आज्ञां पालयन् अहं कुत्र निवासं कुर्याम्? कृपया मम निवासार्थं स्थानं निर्दिशतु।'

कलियुगस्य प्रार्थनां स्वीकृत्य सम्राट् परीक्षित् तस्मै प्रथमं चत्वारि स्थानानि प्रदत्तवान्। तानि स्थानानि एतानि सन्ति-

कलियुगस्य पञ्च निवासस्थानानि

१. द्यूतम्- अत्र असत्यस्य निवासः भवति।
२. मद्यपानम्- अत्र मदस्य निवासः भवति।
३. स्त्रीसङ्गः- अत्र कामासक्तेः निवासः भवति।
४. हिंसा- अत्र निर्दयतायाः वैरस्य च निवासः भवति। ५. सुवर्णम्- अत्र असत्यं, मदः, कामः, वैरं तथा रजोगुणः निवसन्ति।

एवं सम्राट् परीक्षित् कलियुगाय पञ्च निवासस्थानानि प्रदत्तवान्। तदनन्तरं कलियुगः तेषु स्थानेषु राज्ञः आज्ञां पालयन् निवासं कर्तुम् आरब्धवान्।सूतजी कथयति- आत्मकल्याणम् इच्छद्भिः जनैः एतेषां पञ्चानां स्थानानां सेवनं कदापि न कर्तव्यम्। विशेषतः राजभिः, समाजस्य नेतृत्वं कुर्वद्भिः जनैः, धर्मोपदेशकैः गुरुभिः च एतेषां दोषाणां परित्यागे विशेषः सावधानता पालनीया।

ततः सम्राट् परीक्षित् धर्मवृषभस्य नष्टान् त्रयः पादान्- तपः, शौचं, दयां च पुनः प्रतिष्ठापितवान् तथा पृथिव्याः संरक्षणं संवर्धनं च कृतवान्। एवं धर्मरक्षकः, प्रजावत्सलः, शरणागतपालकः च सम्राट् परीक्षित् स्वस्य न्यायप्रियतया, धर्मनिष्ठया, करुणया च इतिहासे अमरः अभवत्। तस्य शासनकाले प्रजाः सुखेन, शान्त्या, धर्मेण च जीवन्ति स्म।

पञ्चदिनानन्तरं परीक्षाः, अपूर्णश्च पाठ्यक्रमः; आर्थिकदृष्ट्या दुर्बलाः विद्यार्थिनः समस्याग्रस्ताः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखीमपुरखीरी। महाविद्यालये गणवेशस्य अनिवार्यता निर्धनानाम् आर्थिकदृष्ट्या दुर्बलानां च विद्यार्थिनां शिक्षणे बाधाम् उत्पादयति। पलियातः गोलातः च दीर्घमार्गं पारयित्वा महाविद्यालयम् आगताः केचन विद्यार्थिनः गणवेशाभावात् कक्षासु प्रवेशं न प्राप्तवन्तः। अतः बाध्याः ते महाविद्यालयस्य बहिः एव उपविश्य अध्ययनं कृतवन्तः। आश्चर्यस्य विषयः अस्ति यत् केवलं पञ्चदिनानन्तरं परीक्षाः प्रारभ्यन्ते, किन्तु विद्यार्थिनां कथनानुसारम् अद्यापि पाठ्यक्रमः पूर्णतया न समाप्तः। विद्यार्थिनां प्रमुखा मागः अस्ति यत् गणवेशस्य कारणेन तेषाम् अध्ययनं न अवरुध्येत। आर्थिकदृष्ट्या दुर्बलानां विद्यार्थिनां कृते विशेषा सुविधा प्रदीयेत, परीक्षाभ्यः पूर्वम् अतिरिक्तकक्षाः सञ्चाल्य अपूर्णः पाठ्यक्रमः शीघ्रं सम्पूर्येत। प्रश्नः अयं वर्तते यत् महाविद्यालयस्य प्राथमिकता गणवेशः अस्ति उत विद्यार्थिनां भविष्यस्य संरक्षणम्?




संस्कृतगीतम्

जीवने सुजीवनम् उद्यमेन प्राप्यते,
सत्येन अहिंसया तत् त्यागेन अवाप्यते।
परिश्रमेण विना वै कुतः सुखं वदतु मे,
विद्यार्जनेन विना वै सद्ज्ञानं कुतः वदतु मे।
तत्परो भवतु आलस्यं तु त्यजतु भो!
यतः जीवने —
कर्म यदि उत्तमं सुफलं सुनिश्चितम्,
कर्म प्रति प्रीतिः भवतु सदा निश्चितम्।
भविष्यति अनेनैव सदैव कल्याणम्,
यतः जीवने —
सल्लक्ष्यं प्रति सदैव भवतु ध्यानकेन्द्रितम्,
ध्यातव्यं वै शृणोतु भवतु मा विकेन्द्रितम्।
इच्छति उन्नत्याः लक्ष्यं सदा साधयेत्,
यतः जीवने —

— डॉ. सुरेशकुमारः शर्मा,
रायपुरम् छत्तीसगढ़म्

बुद्धिमान् काकः



एकदा एकः काकः अतीव पिपासितः आसीत्। सः जलस्य अन्वेषणे इतस्ततः अभ्रमत्, परन्तु कुत्रापि जलं न अपश्यत्। अन्ते सः एकस्मिन् उद्याने एकं घटम् अपश्यत्। तस्मिन् घटे अत्यल्पं जलम् आसीत्।काकः जलं पातुं प्रयत्नम् अकरोत्, परन्तु तस्य चञ्चुः जलं न अस्पृशत्। सः अतीव निराशः अभवत्, किन्तु धैर्यं न अत्यजत्। सः एकम् उपायम् अचिन्तयत्।घटस्य समीपे एव बहवः पाषाणखण्डाः (कंकड़) आसन्। काकः एकैकं पाषाणखण्डं चञ्च्वा गृहीत्वा घटे अक्षिपत्। शनैः शनैः घटस्य जलम् उपरि आगच्छत्।अन्ते जलं घटस्य मुखपर्यन्तम् आगच्छत्। काकः आनन्देन जलं पीत्वा स्वपिपासाम् अशमयत् आकाशे च उदपतत्।शिक्षाः यत्र इच्छा तत्र उपायः।

बालदिवसस्य पूर्वसन्ध्यायां बालकैः सह कथावाचनं गीतप्रस्तुतयश्च

राजकीयसंस्थासु आयोजिते कार्यक्रमे बालकैः उत्साहपूर्वकं प्रस्तुताः कथाः गीतानि च



हिमसंस्कृतवार्ताः- सत्येन्द्रपाठकः, लखनऊ। बालदिवसस्य पूर्वसन्ध्यायां संस्कृत- संस्कृति- विकाससंस्थानस्य उत्तरप्रदेशप्रान्तेन राजकीय- महिलाशरणालये, लखनऊ तथा राजकीयपश्चात्वर्ती- देखरेख- सङ्गठने 'किशोरी', लखनऊ इत्येतयोः स्थलेषु बालकैः सह कथावाचनस्य संवादस्य च कार्यक्रमः आयोजितः। कार्यक्रमे संस्थानस्य उत्तरप्रदेशप्रान्तस्य सम्पर्कप्रमुखा डॉ. सुमनमिश्रा प्रमुखभूमिकां निर्वहितवती। कार्यक्रमस्य अन्तर्गतं संस्थानस्य सदस्यैः बालकेभ्यः विविधाः रोचकाः प्रेरणादायकाश्च कथाः श्रावितः। ततः बालकैः अपि उत्साहपूर्वकं गीतानि कथाश्च प्रस्तुतानि। बालकानां प्रस्तुतिभिः कार्यक्रमः जीवन्ततां प्राप्तवान्, तेषां अन्तर्निहितायाः सृजनात्मक- प्रतिभायाः प्रकटीकरणाय अवसरः प्राप्तः। कार्यक्रमस्य समापनसमये बालकेभ्यः उपहाराः, चॉकलेट-मिष्टान्नानि च वितरितानि। अस्मिन् अवसरे संस्थानस्य सदस्यैः बालकैः सह समयः व्यतीतः, तैः सह संवादः कृतः, तेषाम् अनुभवान् च ज्ञातुं प्रयत्नः कृतः। कार्यक्रमे एषोऽपि भावः प्रमुखतया प्रकटितः यत् बालकेभ्यः केवलम् उपहारप्रदानमेव पर्याप्तं नास्ति, अपितु तैः सह किञ्चित् समयं व्यतीतं कृत्वा, तैः सह संवादं कृत्वा, तेषां वचनानि च ध्यानपूर्वकं श्रुत्वा तेषां भावनानां सम्मानः करणीयः। एतादृशाः अवसराः बालकेषु अपनत्वस्य आत्मविश्वासस्य च भावनां जनयन्ति तथा तेषां व्यक्तित्वविकासं सृजनात्मकाभिव्यक्तिं च प्रोत्साहयन्ति। संस्कृत- संस्कृति- विकास- संस्थानस्य उत्तरप्रदेशप्रान्तस्य पक्षतः आयोजितस्य अस्य उपक्रमस्य उद्देश्यं बालकैः सह आत्मीयसंवादं स्थापयित्वा तेषां मध्ये सकारात्मकं स्नेहपूर्णं च वातावरणं निर्मातुम् आसीत्। गणवेशाभावे कक्षाप्रवेशः निषिद्धः! वाई.डी. महाविद्यालयस्य बहिः अध्ययनं कर्तुं बाध्याः छात्राः



समाचार-वाचनम् — ज्ञानस्य नवोन्मेषः, पठनस्य नूतना परिचितिः रा

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, उन्नावम्। उत्तरप्रदेशस्य उन्नावजनपदस्य नवाबगञ्ज- विकासखण्डे स्थिते जैतपुर- प्राथमिक- विद्यालये समाचारपत्र- वाचनक्रियाकलापमाध्यमेन छात्रेषु पठनरुचिः, पठनसंस्कृतिः च प्रोत्साह्येते। समाचारपत्राणां नियमितवाचनेन छात्राः समसामयिक- घटनाभिः परिचिताः भवन्ति। तेन सह तेषां शब्दज्ञानस्य, शुद्धोच्चारणस्य, भाषाकौशलस्य, आत्मविश्वासस्य च विकासः भवति। अयं क्रियाकलापः छात्रेषु ज्ञानप्राप्तये जिज्ञासाम् उत्पद्यते, स्वविचाराणां प्रभावपूर्णाभिव्यक्तये नूतनां दिशं प्रददाति। उत्तरप्रदेशस्य आधारभूतशिक्षाविभागः परिषद्विद्यालयेषु नवाचारीशैक्षणिकक्रिया- कलापानां माध्यमेन छात्रान् ज्ञानसम्पन्नान्, जागरूकान् तथा आत्मविश्वासयुक्तान् कर्तुं गुणवत्तापूर्णशिक्षायाश्च सुनिश्चिततायै निरन्तरं प्रयत्नशीलः अस्ति।

सिद्धार्थनगरे सामूहिकविवाह-कार्यक्रमस्य आयोजनम्, विद्यालयानां शिक्षकानां सहभागितायै निर्देशः



हिमसंस्कृतवार्ताःवृजेश कुमार पाण्डेय
सिद्धार्थनगरम्, १३ नवम्बर २०२६।

सिद्धार्थनगरजनपदे समाजकल्याणविभागेन सञ्चालितायाः सामूहिकविवाहयोजनायाः अन्तर्गतं नवम्बरमासस्य १७ दिनाङ्के मङ्गलवासरे सामूहिकविवाहकार्यक्रमस्य आयोजनं भविष्यति। अस्य कार्यक्रमस्य आयोजनं शोहरतगढ़तहसीलक्षेत्रे निर्धारितस्थाने प्रस्तावितम् अस्ति।अस्मिन् विषये जिलाविद्यालयनिरीक्षकेण सिद्धार्थनगरजनपदस्य विभिन्नविद्यालयानां प्रधानाध्यापकेभ्यः, प्रधानाचार्येभ्यः, शिक्षक- वृन्देभ्यश्च आवश्यकनिर्देशाः प्रदत्ताः। जिलाधिकारीकार्यालयेन निर्गतस्य आदेशस्य अनुपालनेन सामूहिकविवाहकार्यक्रमस्य सफलसम्पादनाय विद्यालयानां शिक्षकानां सहभागिता सुनिश्चितकर्तुं निर्देशः प्रदत्तः। सम्बन्धितविद्यालयानां प्रधानाचार्याः स्वकीय- विद्यालयस्य शिक्षकाणां सह समन्वयं स्थापयित्वा निर्धारितदिने निर्धारितसमये च निर्दिष्टस्थले उपस्थितिं सुनिश्चितं कुर्युः इति निर्देशिताः।अस्य कार्यक्रमस्य व्यवस्थापनाय राजकीय-इण्टर- महाविद्यालयस्य प्रधानाचार्यः नोडल- अधिकारीरूपेण नामाङ्कितः अस्ति। तेन विद्यालयीयप्रधानाचार्यैः शिक्षकवृन्देन च सह समन्वयं स्थापयित्वा कार्यक्रमस्य सफलतायै आवश्यकव्यवस्थाः करणीयाः।तथा च विंशतिः स्वयंसेवकानां (वालण्टियर्स) सहभागितामपि सुनिश्चितकर्तुं निर्देशः प्रदत्तः। समाजकल्याणविभागस्य सामूहिक- विवाहयोजनायाः सफलक्रियान्वयने प्रशासनं सज्जम् अस्ति।





हिमसंस्कृतवार्ता
डॉ. वर्षा प्रकाश टोणगांवकर
लेखिका, पुणे (महाराष्ट्रम्)

"अन्नपूर्णादेव्याः कथा"

देवी अन्नपूर्णा- शिवाय अपि भिक्षां अददात् । आदिशक्ति आदिमाया भक्ति, तत्वज्ञानस्य सङ्गम् । सा केवलं अन्नदात्री नास्ति अपि तु सम्पूर्ण प्रपञ्च, परमार्थस्य जननी अस्ति । ज्ञान, वैराग्य,सेवा, भक्ति चतुर्षु स्तम्भेषु स्थिता एषा देवी शिवाय अपि भिक्षां ददाति इति श्रुत्वा आश्चर्यम् । किन्तु एतत् तु शास्त्रानुसारेण सत्यम् । प्रसंग—एकदा शिवशक्तयोः विवादः अभवत् । श्रीशङ्करः उक्तवान्- एतं जगत् केवलं 'माया' तथैव अन्नं अपि भ्रमेव । केवलं आत्मा अजरः, अमरः, अविनाशी अस्मिन् कारणेन अन्नस्य न कोऽपि आवश्यकता । देवी केवलं मन्दं स्मितं कृतवती । तदनन्तरं सा अन्नं सर्वस्मात् ब्रह्माण्डात् अन्तर्हिता । जगति कोलाहलं जाता देवाः, ऋषयः, मानवाः, प्राणिनः सर्वे क्षुधार्ताः। अन्तिमतः श्रीशिवोऽपि बुभुक्षितः।

तदा काशी नगर्याम् 'अन्नपूर्णा' प्रकटिता तस्या हस्तौ भिक्षापात्रं तथा च अन्नपुरीतं सुवर्णकलशम् आसीत् । सा काश्याः अन्नमण्डपे उपवेशिता । सा क्षुधार्तानां जनानां कृते अन्नदानं कृतवती । तस्मिन् समये श्रीशिवोऽपि स्वयं भिक्षां संग्रहितुम् आगतः । तदा देवी पृष्टवती- "भो नाथः! अन्नं यदि माया मन्यते तर्हि भिक्षा किमर्थम् ?" श्रीशिवः हसित्वा उत्तरत्- "एतद् मम् अहङ्कारस्य विसर्जनम् अस्ति । भवती एव माया तथा च परब्रह्म ।"

एषा घटना न केवलं पौराणिकः, दार्शनिकः अपि अस्ति । {सन्दर्भः-स्कन्दपुराण, काशीखण्ड् } तत्वज्ञानः- शिवादिशक्तिः सन्तुलनम् ।

गूढार्थः- शिवः निर्गुणतत्वः, आदिशक्ति सगुण सृष्टि। शिवाय स्थिरतां दातुं शक्तिः आवश्यकी । अन्नं प्रपञ्चः अस्ति परन्तु प्रपञ्चात् एव परमार्थः खलु ? एषः तत्वज्ञानं आदिशक्ति दर्शितवती । काशीनगर्याम् अन्नपूर्णादेव्याः मन्दिरम् अस्ति तत्र प्रतिदिनं भोजनदानं भवति । इतः कोऽपि क्षुधार्तः न गच्छति । पितामहः ब्रह्मदेवतः शिवपर्यन्तं सर्वे इतः भोजनं गृहीतवन्तः । 'अन्नं ब्रह्मेति' इति उपनिषदि लिखितम् अस्ति । अन्ते आद्य शङ्कराचार्य विरचितम् 'अन्नपूर्णा स्तोत्रम्'-

"अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वती ।।" स्त्रियाः मातृस्नेहः अत्र दृश्यते ।

'अन्नपूर्णादेव्यैनमः।'

व्याकरणचिन्तनम् -०८

'तिङश्च।' इति सूत्रम्।
स्मर्तव्यं यत्-
तिङन्त + तराम् / तमाम् इति ।
वाक्योदाहरणानि -
(तराम् - तरप् इत्यत्र द्वयोः तुलना)
रामः श्यामात् पठतितराम्।
सीता गीतायाः गायतितराम्।
कृष्णः अर्जुनात् युद्ध्यतितराम्।
बालकः बालिकायाः हसतितराम्।
माता पितुः स्निह्यतितराम्।
गुरुः शिष्यात् जानातितराम्।
सूर्यः चन्द्रात् प्रकाशतितराम्।
अहं त्वतः लिखामितराम्।
अश्वः गर्दभात् धावतितराम्।
गङ्गा यमुनायाः वहतितराम्।
तमाम् - तमप् इत्यत्र चेत् बहुषु तुलना , यथा --
रामः सर्वेषु पठतितमाम् ।
सीता सर्वासु गायतितमाम्।
कृष्णः सर्वेषु धावतितमाम्।
सः सर्वेषु लिखतितमाम्।
माता सर्वासु वदतितमाम्।
गुरुः सर्वेषु जानातितमाम्।



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

सूर्यः सर्वेषु प्रकाशतितमाम्।
बालकः सर्वेषु हसतितमाम्।
रामः सर्वेषु गच्छतितमाम्।
कृष्णः सर्वेषु क्रीडतितमाम्।
पचतितराम् -- तिङश्च ।
पटुतरः - अतिशायने तमबिष्ठनौ
भेदः - पटुतरः = गुणस्य अतिशयः,
पचतितराम् = क्रियायाः अतिशयः इति ।

श्रीमद्भगवद्गीतायाः संस्कृत-प्रश्नोत्तरी

१. प्रश्नः – श्रीमद्भगवद्गीता कस्य महाग्रन्थस्य अंशः अस्ति?उत्तरम् – श्रीमद्भगवद्गीता महाभारतस्य (भीष्मपर्वणः) अंशः अस्ति।

२. प्रश्नः – भगवद्गीतायां कति अध्यायाः सन्ति?उत्तरम् – भगवद्गीतायाम् अष्टादश (१८) अध्यायाः सन्ति।

३. प्रश्नः – भगवद्गीतायां कति श्लोकाः सन्ति?उत्तरम् – भगवद्गीतायां सप्तशतम् (७००) श्लोकाः सन्ति।

४. प्रश्नः – श्रीकृष्णः कस्मै गीतायाः उपदेशं दत्तवान्?उत्तरम् – श्रीकृष्णः अर्जुनाय गीतायाः उपदेशं दत्तवान्।

५. प्रश्नः – कस्मिन् क्षेत्रे गीतायाः उपदेशः प्रदत्तः?उत्तरम् – धर्मक्षेत्रे कुरुक्षेत्रे गीतायाः उपदेशः प्रदत्तः।

६. प्रश्नः – गीतायाः प्रथमः श्लोकः केन उक्तः?उत्तरम् – गीतायाः प्रथमः श्लोकः धृतराष्ट्रेण उक्तः।

७. प्रश्नः – कस्य दिव्यदृष्ट्या युद्धस्य वृत्तान्तः धृतराष्ट्राय श्रावितः?उत्तरम् – सञ्जयस्य दिव्यदृष्ट्या युद्धस्य वृत्तान्तः धृतराष्ट्राय श्रावितः।



हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्ता-संवादः

नन्दिनी - नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये! अद्य काः विचित्राः वार्ताः सन्ति?

काव्या - नमस्ते नन्दिनि! अद्य चतस्रः अद्भुताः वार्ताः सन्ति। प्रथमा वार्ता चीनदेशात्। तत्र एकस्मिन् अन्तर्जाल-विक्रय-उत्सवे एकेन क्रेत्रा केवलं सार्ध-एक-शत-रूप्यकैः एकं द्वि-प्रकोष्ठयुक्तं गृहं क्रीतम्।

नन्दिनी - अहो आश्चर्यम्! एतावता अल्पमूल्येन गृहं प्राप्तम् इति विश्वासः एव न भवति! अस्तु, द्वितीया वार्ता का?

काव्या - द्वितीया वार्ता कनाडादेशस्य विनिपेग्-नगरात्। तत्र एकया भोजनालय-स्वामिन्या पञ्चदश-वर्षेभ्यः न्यूनानां बालानां प्रवेशः निषिद्धः। तेन क्रुद्धैः जनैः भोजनालयस्य उद्घाटनात् पूर्वम् एव अन्तर्जाले "अत्र विषाक्तं भोजनं दत्तम्" इति असत्याः समीक्षाः लिखिताः।

नन्दिनी - हह! भोजनालयस्य उद्घाटनात् पूर्वम् एव भोजनं विषाक्ततया निन्दितम् तु अतीव हास्यास्पदम्! तृतीयां वार्तां श्रावय।

काव्या - तृतीया वार्ता अस्माकम् उत्तराखण्ड-राज्यात्। गुरुवासरे प्रातःकाले हरिद्वार-देहरादून-राजमार्गे एकेन वन्य-गजेन एकस्य द्विचक्रिका-चालकस्य उदरस्य वक्षसः च उपरि द्विवारं पादः स्थापितः। तथापि सः नरः विना कञ्चित् व्रणम् उत्थितः रक्षितः च।

नन्दिनी - अहो दैवकृपा! गजस्य पादाघातात् अपि सः जीवितः इति महद् आश्चर्यम्। चतुर्थी वार्ता का?

काव्या - चतुर्थी वार्ता कर्णाटक-राज्यात्। 'आइ. डी. फ्रेश्' (iD Fresh) संस्थायाः प्रमुखेण मुस्तफा-महोदयेन स्व-कर्मचारिभ्यः नूतनम् उद्योगम् आरब्धुम् अंशतः सवेतनः अवकाशः दत्तः। यदि तेषां नूतनः उद्योगः न सफलः भवति, तर्हि ते पुनः संस्थायां स्वीकृताः भविष्यन्ति।

नन्दिनी - अहो उदारता! सामान्यतः स्वामिनः कर्मचारिणां निर्गमनं न इच्छन्ति, किन्तु अत्र तु तेभ्यः प्रोत्साहनं दत्तम्। एताः सर्वाः विचित्राः वार्ताः श्राविताः, अतः कृतज्ञताम् अर्पयामि तुभ्यम् काव्ये!

काव्या - मम सौभाग्यम्! पुनर्मेलिष्यामः।